CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

230

220

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सरस्वती न सुभगा मयस्करत्
वाल्मीकि विद्यापीठ-पुस्तकालय

भूमिका

श्रीमद्भागवत पुराण में श्रीशुकदेवजी का वचन है कि, “ यथा तृणजलौकैवं देही कर्मगतिङ्गतः ” अर्थात् जीव मनुष्य देह धारणकर इस कर्मभूमि (मर्त्यलोक) में आकर जैसा कर्म करता है देहत्यागानन्तर अपने कर्मानुरुप गति को पाता है। गोसाईं श्रीतुलसीदासजी ने भी लिखा है कि, कर्मप्रधान विश्व करि राखा, जो जस करैं सो तस फल चाखा, कर्म के माने हैं करना (करोतीति कर्म) वह सदसद् भेद से द्विविध है श्रुतिस्मृति विहितकर्म सत्कर्म और तदविहित असत्कर्म जिसके करने से नरकादि यन्त्रणा के अनन्तर पशु पक्षि कीटादि तीर्यक्योनि में उत्पन्न होकर जीवको दुःसह दुःख भोगना पड़ता है। सत्कर्म भी श्रौतस्मार्त्तभेदसे द्विविध याने श्रुतिविहित कर्म श्रौत यथा, स्वर्गकामोयजेत, अग्निहोत्रं जुहुयात्स्वर्गकामः, दर्शपूर्णमासाभ्यां यजेत स्वर्गकामः ” इत्यादि । स्मृतिविहित कर्म स्मार्त्त देवस्थापन, जलशयोत्सर्ग, महादानादि, सत्कर्म करने से जीव को स्वर्गाद्युत्तमलोकप्राप्त्यनन्तर उत्तम कुल में सुन्दर देह धारणानन्तर सुख होता है अतएव श्रुतिस्मृतियों में अनेक सत्कर्म कहे गये हैं । इन कर्मों को करने में प्रायः मण्डपकुण्ड की आवश्यकता पड़ती है अतएव प्राचीन आचार्यों ने मण्डपकुण्ड की रचना के विषय के अनेक ग्रन्थ बनाये हैं किन्तु उनके ग्रन्थ में किसी २ में केवल कुण्डही तथा किसी २ में केवल मण्डप ही का विधान है पर १५४१ शक में विट्ठल दीक्षितजीने मण्डपकुण्डसिद्धि नाम का एक ऐसा अपूर्व ग्रन्थ बनाया कि इस एकही ग्रन्थ से मण्डप तथा कुण्ड दोनों विषयका पूर्णज्ञान छात्रों को होने लगा इसलिये प्राचीन ग्रन्थोंका पठन पाठन प्रायः बन्दसा हो गया और ३०७ वर्ष उक्तग्रन्थ को बने हुआ आज तक उसका अबाध पठन पाठन हो रहा है कारण यह कि उसके रचनाकाल से आज तक किसी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्वान को उसका प्रतिद्वन्द्वी ग्रन्थ बनाने की चेष्टा न हुई। यद्यपि उक्त ग्रन्थ गणितप्रधान होने के कारण पढ़ने पढ़ानेवालों के सुगमता के लिये ग्रन्थकारने स्वयं उसकी व्याख्या तथा गणितोदाहरण भी कर दिया था परन्तु उसके श्लोकों का यथार्थ अन्वयार्थ लगना गणितानभिज्ञों को असम्भव होने के कारण लेखकाध्यापकाध्येतृदोषसे मूल में बहुत सी अशुद्धियां आगई थीं यही नहीं बल्कि २, ३, ४. इत्यादि हाथों का कुण्ड रचना तो असाध्य ही था अस्तु कुछ दिन हुये मेरे पास इसके पढ़ने के लिये कुछ छात्र आते थे उनको तो मैंने पढ़ा दिया पर इस उत्तमग्रन्थ को सुधारने की चिन्ता मेरे मन में लगी रही श्रीविश्वनाथजी की असीम कृपा तथा कुछ मित्रों के साहाय्य से आज उस ग्रन्थ को यथासाध्य सरलसान्वयबलदानाम की संस्कृत टीका तथा सोदाहरण भाषाभाष्य और प्रत्येक कुण्डों के चित्रों के साथ उनकी सारिणी छात्रोपयोगी बनाकर आप विद्वानों के सन्तोषार्थ श्रीविश्वनाथजी के चरणों में अर्पण करता हूं। प्रसङ्गवश छात्रों के विशेषज्ञानोपयोगी समझ कर इस के साथ २ वास्तवकुण्डसिद्धि नाम का भी एक मूलग्रन्थ संकलित है आप लोगों के रुचिकर होने से द्वितीय संकलन में इस की भी व्याख्या कर दी जायगी सम्भवन है कि बुद्धि के चाञ्चल्य दोषसे इसमें कुछ त्रुटियां रह गई हों उसे विज्ञमहानुभाव सूचित करने की कृपा करेंगे तो मैं धन्यवाद पूर्वक उसे सुधारने की चेष्टा करूंगा सम्प्रति उसके लिये क्षमाप्रार्थी हूं। इसके रचनामें पं. श्रीविद्याधरजी गौड़ प्रोफेसर हिन्दू विश्वविद्यालय से मुझे अपूर्व सहायता मिली है उसके लिये उक्त महानुभाव को धन्यवाद है तथा पं. श्रीकाशीनाथजी अग्निहोत्री की भारतीशाला से मुझे जो सहायता मिली है उसके लिये उक्त पंडितजी को भी धन्यवाद है।

श्री बलदेव ज्यौतिषी

सूचीपत्रम्।

विषयः	पृष्ठम्	विषयः	पृष्ठम्
प्रथमाध्यायः–		अथ द्वितीयाध्यायः	
मङ्गलाचरणम् … …	१	नवकुण्डनिवेशनम् …	२७
ग्रन्थकर्तृनाम … …	२	पंचकुण्डैककुण्डयोर्निवेशनम् … … …	,,
हस्तादिपरिभाषा… …	३	एककुण्डीपक्षे विशेषः …	२८
दिक्साधनार्थमित्तिकसंख्यता… …	४	कुण्डफलम् … … …	२९
स्थूलपूर्वापरसाधनं …	६	हवनसंख्यया कुण्डमानम्… … …	३०
सूक्ष्मपूर्वापरसाधनम् …	७	क्षेत्रमानम् … … …	३२
अस्य चित्रम्… … …	,,	योनिनिवेशनम् … …	३४
दक्षिणोत्तरसाधनम् …	८	चतुरस्रकुण्डम् … ..	३५
मण्डपे विशेषः … …	१२	अस्य सारिणी … …	३७
मण्डपप्रमाणम् … …	१३	योनि कुण्डम् … …	,,
द्वारमानम् मध्यवेदीमानंच … …	१४	अस्यसारिणी … …	३९
ग्रहवेदीमानं … … …	१६	अर्धचन्द्रकुण्डम् … …	४०
स्तम्भमानं तन्निवेशनंच…	१७	अस्यसारिणी … …	४१
वलिकानिवेशनम्… …	१८	त्रिभुजकुण्डम् … …	,,
तोरणकाष्ठव्यवस्था …	१९	वर्तुलकुण्डम्… … …	४२
तोरणमानं तन्निवेशनंच…	२०	त्रिकोणकुण्डसारिणी …	४३
फलकादिनिवेशनं… …	२१	षडस्रकुण्डम् … …	४४
कीलकचक्रम्… … …	२३	वृत्तकुण्डसारिणी… …	४६
ध्वजनिर्माणम् … …	,,	अन्यषडस्रकुण्डम्… …	४७
ध्वजपताकानिवेशनं …	२४	प्रथमषडस्र सा … …	४८
मण्डपालङ्करणानि… …	२५	पद्मकुण्डम् … …	४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयः	पृष्ठम्	विषयः	पृष्ठम्
अन्यषडस्र सा.	५०	खातमानम्मेखलामानं च...	६१
विषमाष्टास्रकुण्डं	५१	प्रकारान्तरेण मेखलामानं	
पद्मकुण्डसा.	५२	नाभिमानं च	६२
समाष्टास्रकु.	५४	नाभिलक्षणम्	६४
विषमाष्टास्रसा.	५५	पंचमेखलासारिणी ...	६५
समाष्टास्रसा	५६	योनिलक्षणम्	६६
स्थाण्डिलम्	५७	नाभिसारिणी	६७
अथ तृतीयोध्यायः		योनि सारिणी	६९
खातकुण्डयोर्मानम् ...	५८	द्वादशाङ्गुलमेखला	
अधमादिमेखला	५९	पक्षे योनिलक्षणम् ...	,,
खननमेखलासारिणी ...	६०	ग्रन्थोपसंहारः	७०

॥ श्रीगणेशाय नमः ॥

मण्डपकुण्डसिद्धिः ।

ग्रन्थारम्भे मङ्गलमाचरत्याचार्य्यः शार्दूलविक्रीडितवृत्तेन ॥

मू० गाढ़ं ध्वान्तमनेकभानुजठरे राजत्कलाधारिणि ।
प्रोदञ्चच्छफरीयुगं दरदलत्पद्मेऽणुहीरावलिम् ॥
स्वर्णोत्तुङ्गगिरिद्वयाधरचरीदीनाङ्कलिन्दात्मजाम् ।
पश्याश्चर्य्यमिदं शिवामिति वदन् स्मेरः शिवः पातु वः ॥१॥

चञ्चच्चन्द्रिरचन्द्रिकेन्दुविशदं सौरीं स्रवन्तीं सदा ।
न्यस्यन्तं शिरसि स्वमन्दमुदितं वामाङ्गया वामया ॥
मध्ये मानसमाकलय्य बलदानाथाभिरामां सुधी ।
ज्योतिर्विद् बलदेवशर्मसुकृती टीकां कदां भावये ॥ १ ॥

अ० स्मेरः शिवः वः पातु । अये गौरीत्यध्याहारः । इदमाश्चर्य्यम्पश्य अनेकभानुजठरे गाढ़ं ध्वान्तम् । राजत्कलाधारिणि चन्द्रइत्यध्याहारः प्रोदञ्चच्छफरीयुगम् । दरदलत्पद्मेऽणुहीरावलिम् । स्वर्णोत्तुङ्गगिरियाधरचर्रीदीनां कालिन्दात्मजाम् । पश्यैतत्प्रतिखण्डे योज्यम् ॥ १ ॥

सं. टी. स्मयत इति स्मेरः स्मितमुखः शिवोवोयुष्मान् पातु रक्षतु । किङ्कुर्वन् गौरीम्प्रतीति वदन् । इति किमित्यतआह । अये गौरीदम्वक्ष्यमाणमाश्चर्य्यं कौतुकम्पश्यावलोकय । अनेकसंख्याकानां भानूनां जठरे कुक्षौ (पिचण्ड कुक्षी जठरोदरमित्यमरः) गाढ़ं दृढ़ं (तीव्रैकान्तनितान्तानि गाढ़वाढ़दृढ़ानि चेत्यमरः) ध्वान्तमन्धकारम्पश्यैतन्मिषेणगौरीमस्तकस्थरत्नखचितमुकुटान्तर्गतकेशवर्णनम् । राजन्तीनां स्फुरन्तीनां कलानां षोडशभागानां (कलास्तु षोडशो भाग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यमरः) धारिणि दधाने चन्द्रमसीति शेषः प्रकर्षेण उदिति वितर्केण अञ्चति गच्छतीति (अञ्चु गतिपूजनयोः) तथाभूतं सफर्य्योर्मत्स्ययोर्युगं द्वयरूपश्यैतान्मिषेण चन्द्रमुख्यागौर्य्यानेत्रद्वयवर्णनम् । किञ्च दरमीषत् विकसच्च तत्पद्मञ्च तथाभूतईषद्विकासितपद्मेऽणूनामतिसूक्ष्माणां हीराणामालिः पङ्क्तिः ताम्पश्यैतान्मिषेण स्मितगौरीमुखपद्मान्तर्गतदन्तपङ्क्तिवर्णनम् । किञ्च स्वर्णस्य स्वर्णमयस्य उतुङ्गं उन्नतं यद्गिरिद्वयं पर्वतद्वयंतस्याधरेऽधस्तात् (अधस्तादपि चाधर इत्यमरः) चरति गच्छत्यतएव दीनां कृशां कलिन्दात्मजां यमुनां पश्यैतन्मिषेण गौर्य्यागौरपृथुङ्गस्तनाधरगतरोमावलीवर्णनम् ॥ १ ॥

भा. भा. किसी समय में प्रसन्नचित्त शिवजी हँसकर पार्वतीजी से उनके अङ्गों की शोभा वर्णन करते हुये कहते हैं कि हे पार्वती सहस्रों सूर्य के समान प्रकाशमान अपने मुकुट के मध्य यह कृष्ण केशरूपी कठिन अन्धकार देखो तथा पूर्ण चन्द्ररूपी अपने मुखमण्डल के मध्य चंचल नेत्रस्वरूप दो मछलियों को देखो तथा कुछ फूले हुये कमल के समान हँसते हुये अपने मुखकमल के मध्य दन्तरूप हीराओं की पंक्ति देखो तथा स्वर्णमय स्थूलोन्नत दो पर्वतों के सदृश अपने कुचद्वय के मध्य में वर्त्तमान कृष्णरोमावलीरूप यमुना को देखो ये कैसी आश्चर्यजनक वस्तुयें हैं कवि कहता है कि ऐसे प्रसन्नचित्त शिवजी आपकी रक्षा करें ॥ १ ॥

स्वाख्यापूर्वकं ग्रन्थनामोपजातिछन्दसाह ।

मू० कृष्णात्रिगोत्रे नितराम्पवित्रे पवित्रकर्माऽजनि बूवशर्म्मा ।
तत्सूनुना विठ्ठलदीक्षितेन विरच्यते मराड्पकुराडसिद्धिः २

अ० पवित्रकर्म्मा बूवशर्म्मा नितरां पवित्रे कृष्णात्रिगोत्रे अजनि । तत्सूनुना विट्ठलदीक्षितेन मण्डपकुण्डसिद्धिः विरच्यते ॥ २ ॥

सं. टी. पवित्रं शुद्धं कर्म्म यजनयाजनादिकं यस्यासौ बूवनामको ब्राह्मणः नितरामतिशयेन पवित्रे शुद्धे कृष्णात्रिगोत्रेऽजनि प्रादुरभूत् । तस्य बूवशर्म्मणः सूनुना पुत्रेण विट्ठलदीक्षितेन मण्डपकुण्डयोः सिद्धिर्यस्मिन्नसौ ग्रन्थो विरच्यते क्रियत इत्यर्थः ॥ २ ॥

भा. भा. ग्रन्थकार अपने पिता बूव नाम के साथ शर्म्मा साधारण शब्द देते हैं तथा अपने विट्ठल नाम के साथ दीक्षित विशिष्ट शब्द का प्रयोग करते हैं इसलिये मालूम होता है कि इन के पिता बूवशर्मा साधारण याने अपठित ब्राह्मण थे तथा उन्होंने अपने पुत्र का नाम विट्ठल रक्खा इससे भी मालूम होता है कि वह अपठित थे नहीं तो अपने पुत्र का नाम शुद्ध संस्कृतमय शब्दों में अवश्य रखते ॥ २ ॥

कुण्डादि विवक्षुस्तावद्धस्तादिपरिभाषां विपरीताख्यानक्यनुष्टुब्भ्यामाह ।

मू० कृतोर्ध्वबाहोः समभूर्गतस्य कर्त्तुः शरांशःप्रपदोच्छ्रितस्य ।
यो वा सहस्तोऽस्य जिनांशकोऽपि स्यादङ्गुलं तत्तदिभांशकोयः ॥३॥ यवो यूका च लिक्षा च वालाग्रश्चैवमादयः ।
कृतमुष्टिकरोरत्निररत्निरकनिष्ठिकः ॥ ४ ॥

अ० कृतोर्ध्वबाहोः समभूर्गतस्य वा प्रपदोच्छ्रितस्य कर्त्तुः यः शरांशः स हस्तः स्यात् अस्य जिनांशकोऽपि अङ्गुलं स्यात् तत्तदिभांशकोयः स यवः च पुनः यूका च पुनः लीक्षा च पुनः वालाग्रम् एवमादायः स्युः । कृतमुष्टिकरः रत्निः अकनिष्ठिकः अरत्निः स्यादिति ॥ ३ ॥ ४ ॥

सं. टी. कृतावूर्ध्वौ बाहू येन तस्य तथा समायां मुकुरोदरसन्निभायां भुवि पृथिव्यां गतस्य समपादतया स्थितस्य वा प्रपदं पादाग्रं तेन भुवमालम्ब्योच्छ्रितस्य कर्त्तुर्यजमानस्य यः शरांशः पञ्चमांशः सहस्तः (तथा च कात्यायनः) यजमानेनोर्ध्वबाहुना प्रपदोच्छ्रितेन समास्थितेन वेति । अस्य हस्तस्य जिनांशकश्चतुर्विंशत्यंशः अपीति निश्चयेन अङ्गुलं स्यात् । तस्य तस्याङ्गुलादेर्यइभांशकोऽष्टमांशः स यवादिकः स्यात् तद्यथाङ्गुलस्याष्टमांशो यवः यवस्याष्टमांशोयूका तस्याअष्टमांशो लीक्षा तस्याअष्टमांशोवालाग्रमेवममुना प्रकारेणादयोऽर्थाद्रथरेण्वादि संज्ञा ज्ञेया यथा वालाग्रस्याष्टमांशोरथरेणूरथरेणोरष्टमांशस्त्रसेरणुः त्रसरेणोरष्टमांशः परमाणुरिति (तथा चादित्यपुराणे) जालान्तरगते भानौ यत्सूक्ष्मं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दृश्यतेरजः प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते। त्रसरेणुस्तु विज्ञेयोयोऽष्टौ स्युः परमाणवः त्रसरेण्वस्तु ते ह्यष्टौ रथरेणुस्तु संस्मृतः। रथरेण्वस्तु ते ह्यष्टौ वालाग्रं तत्स्मृतं बुधैः वालाग्रं त्वष्टलीक्षास्तु यूका लीक्षाष्टकं स्मृतम्। अष्टौ लीक्षायवं प्राहुरङ्गुलन्तु यवाष्टकम्। कृता मुष्टिर्येन स चासौ करः मुष्टिबद्धकरइत्यर्थ रत्नीरत्निसंज्ञकः स्यात् सात्वेकविंशत्यङ्गुलात्मिका तथा अकनिष्ठिकोमुक्तकनिष्ठिकः कर अरत्निरर्थादरत्निसंज्ञः स्यात्सातु द्वाविंशत्यङ्गुलात्मिका (तथोक्तश्चादित्यपुराणे) रत्निस्त्वङ्गुलपर्वाणि विज्ञेयस्त्वेकविंशतिः अरत्निरकनिष्ठः स्यात्षोड़शांशवियुक्कर इति ॥ ३ ॥ ४ ॥

भा. भा. समभूमि पर समपादस्थित अथवा पादाङ्गुष्ठ के बल दोनों भुजों को आकाशाभिमुख उठाकर खड़े हुये यज्ञकर्त्ता के लम्बाई का पाँचवा भाग १ हाथ इसका चौवीसवाँ भाग १ अङ्गुल इसका आठवाँ भाग १ यव इसका आठवाँ भाग १ यूका इसका आठवाँ भाग १ लीक्षा इसका आठवाँ भाग १ वालाग्र होता है। तथा मुष्टिबँधे हुए हाथ की संज्ञा रत्नि है यह २१ अङ्गुल की होती है और केवल कनिष्ठिका को मुक्त कर दे तो उसकी संज्ञा अरत्नि है यह २२ अंगुल की होती है ॥ ३ ॥ ४ ॥

दिक्साधनं विवक्षुस्तावदितिकर्त्तव्यतां स्रग्धरयाह।

मू० ज्ञात्वा पूर्वं धरित्रीं दहनखननसंप्लावनैः सम्विशोध्य।
पश्चात्कृत्वा समानां मुकुरजठरवद्वाचयित्वा द्विजेन्द्रैः ॥
पुण्याहं कूर्मशेषौ क्षितिमपि कुसुमाद्यैः समाराध्य शुद्धे।
वारे तिथ्यां च कुर्य्यात्सुरपतिककुभः साधनं मण्डपार्थम् ५

अ० पूर्वं धरित्रीं ज्ञात्वा पश्चात् दहनखननसंप्लावनैः सम्विशोध्य मुकुरजठरवत् समानां कृत्वा द्विजेन्द्रैः पुण्याहं वाचयित्वा कुसुमाद्यैः कूर्मशेषौ क्षितिमपि समाराध्य शुद्धे वारे च पुनः तिथ्यां मण्डपार्थं सुरपतिककुभः साधनं कुर्य्यात् ॥५॥

सं. टी. पूर्वमादौ धरित्रीं पृथ्वीं ज्ञात्वेयम्भूर्मण्डपादिकर्तुं योग्या न वेति विचार्य्य (तथोक्तं मुहूर्त्तमार्त्तण्डे) स्वभ्रं हस्तमितं

खनेदिह जलं पूर्णं निशास्ये न्यसेत् प्रातर्दृष्टजलं स्थलं सद्जलं मध्यन्त्वसतस्फाटितम्। श्वेतारक्तकपीतकृष्णवसुधा स्वादुः कटुस्तिक्तका काषाया घृतशोणितान्नमदिरागन्धा शुभा विप्रतः। सद्मप्रश्नकृतोमुखात्प्रथमतोवर्गादिवर्णोद्गमश्चेत्ताद्दिग्गतमादिशेत्तु हृपयैः शल्यंसुधीर्मध्यतइति (अन्यच्च शारदातिलके) ईशकोणप्लवा सा च कर्तुः श्रीदा सुनिश्चितम्। पूर्वप्लवा वृद्धिकरी वरदातूत्तरप्लवा शेषकाष्ठाप्लवा भूमिर्धनायुर्गृहनाशिनी। ब्राह्मणी भूः कुशोपेता चात्रिया शरसंकुला। कुशकाशाकुला वैश्या शूद्रा सर्वतृणाकुलेत्यादिना ज्योतिर्विदा कर्मयोग्यां शुद्धां भूमिं ज्ञात्वा पश्चादनन्तरं दहनं अग्निना भस्मीकरणमेतेन तुषकण्टकादेर्नाशोजायते खननं प्रसिद्धमेतेन वल्मीकपाषाणादेर्नाशोजायते सम्यक् प्लावनं हलादिना चालनमेतेन विदीर्णायाः भूमेर्विवरादीनां नाशः समता च जायते। यतः (शारदातिलके) स्फुटिता च सशल्या च वल्मीकारोहिणी तथा दूरतः परिवर्ज्या भूः कर्त्तुरायुर्धनापहेति अतएतैर्भूमिं संशोध्य मुकुरजठरवद्दर्पणोदरवत्समानां निम्नोन्नतरहितां कृत्वा द्विजेन्द्रैर्वेदपाठिभिर्ब्राह्मणैर्यतस्तएव ब्राह्मणेषु श्रेष्ठाः पुण्याहं वाचयित्वा कुसुमाद्यैः पुष्पाद्यैः पञ्चोपचारैः षोड़शोपचारैर्वा कूर्मशेषौ कच्छपशेषनागौ क्षितिं पृथ्वीमपिशब्दाद्वाराहं समराध्य सम्पूज्य शुद्धे वारे दिने शुद्धायां तिथ्याञ्चार्थाज्ज्योतिःशास्त्रोक्ते मुहूर्त्ते मण्डपार्थं मण्डपनिर्म्माणाय सुराणां देवानाम्पतिरिन्द्रस्तस्य ककुभः प्राचीदिशः साधनं कुर्य्यादिति ॥ ५ ॥

भा. भा. पहले जिस भूमि पर मण्डपबनाना हो उसे किसी चतुर ज्योतिषी से परीक्षा कराकर तदनन्तर उसे अग्नि से शुद्ध करै जिससे कंटक व तृण का नाश हो जाय तदनन्तर उसे खनवा डारै जिससे विसउट का नाश हो जाय तदनन्तर हलसे जोतवादे जिससे समान होजाय इस तरह समभूमि बनाकर शुभमुहूर्त्त में पुण्याहवाचन करके कच्छप शेषनाग वाराह तथा पृथ्वी का पूजन करके वक्ष्यमाण रीति से दिक्साधन करै ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थूलपूर्वापरसाधनमुपजातिविपरीताख्यानकीभ्यामाह ।

सू० नृपांङ्गुलैः सम्मितकर्कटेन सूत्रेण वा वृत्तवरं विलिख्य । रव्यङ्गुलं शङ्कुममुष्य मध्येनिवेशयेत्खाक्षिमिताङ्गुलीभिः ६ चतसृभिश्चापि ऋजूत्तमाभिः संस्पृष्टशीर्षन्तु समेषिकाभिः तच्छङ्कुभा यत्र विशेदपेयाद्वदेत्क्रमात्ते वरुणेन्द्रकाष्ठे ॥७॥

अ० नृपाङ्गुलैः सम्मितकर्कटेन सूत्रेण वा वृत्तवरं विलिख्य अमुष्य मध्ये चतसृभिः खाक्षिमिताङ्गुलीभिः च पुनः ऋजूत्तमाभिरपि तु पुनः समेषिकाभिः संस्पृष्टशीर्षं रव्यङ्गुलं शंकुं निवेशयेत् । तच्छङ्कुभा यत्र विशेत् यत्र चापेयात्क्रमात्ते वरुणेन्द्रकाष्ठे वदेत् ॥ ७ ॥

सं. टी. नृपाङ्गुलैः सम्मितकर्कटेनार्धदृग्व्यासार्धेन वाथवा सूत्रेणैतदुक्तम्भवति षोडशाङ्गुलसूत्रस्यैकमग्रमेकेन हस्तेन स्थिरं कृत्वा धृतापरप्रान्तस्यान्यहस्तस्य भ्रामणेन वृत्तवरमुत्तमं वृत्तं विलिख्य। अमुष्यास्य वृत्तस्य मध्ये केन्द्रविन्दौ चतसृभिः खाक्षिमिताङ्गुलीभिर्विंशत्यङ्गुलपरिमिताभिः ऋजुभिः सरलाभिरुत्तमाभिर्दृढाभिः समेषिकाभिरेतदुक्तम्भवति परिधेस्तुल्यं चतुर्विभागं कृत्वा प्रतिभागमेकैकं कीलकं निखनेदनन्तरं प्रतिकीलकं पूर्वोक्तलक्षणोपेताश्चतस्रः पट्टिकानिवध्य ताभिरपरप्रान्तैः संस्पृष्टशीर्षमर्थात्तासामपरप्रान्तं शङ्कुशीर्षे निधायैवङ्कृते कर्णसमत्त्वाच्छङ्कुसमत्वं भवेदेवम्भूतं रव्यङ्गुलं द्वादशाङ्गुलं शङ्कुं निवेशयेत्स्थापयेत् । तस्य शङ्कोर्भा छाया यत्र विन्दौ प्रविशेत्प्रवेशं करोति यत्र चापेयान्निर्गच्छेत् क्रमात्ते वरुणेन्द्रकाष्ठे पश्चिमप्राचीदिशौ वदेत्कथयेदित्यर्थः सूर्योदये छायायाअनन्तत्त्वात्तदग्रं पश्चिमदिशि वृत्तवहिर्गतमासीदनन्तरं यथा यथा रविः क्षितिजादुपरि गच्छेत्तथा तथा सङ्कोच्यमाना छायाल्पा स्याद्यदा तु षोडशाङ्गुलसमा तदा पश्चिमदिशि परिधौ कुत्रचिद्विन्दौ प्रविशति तत्र वरुणादिगेवं मध्यान्हादनन्तरं सूर्यस्य पश्चिमदिक्स्थत्त्वादुदृग्व्युन्मुखी छाया पूर्वदिशि गच्छेद्यदातु षोडशाङ्गुलतुल्या स्यात्तदा पूर्वदिशि कुत्रचिद्विन्दौ परिधिं भित्वा बहिरपेयात्तत्रेन्द्रदिगिति सर्वं निरवद्यम् ॥ ६ ॥ ७ ॥

भा. भा. कुण्डमण्डप निर्माण के लिये पहले दिक्साधन करना परमावश्यक है कारण यह कि दिशा शुद्ध न होनेसे यज्ञ में विघ्न होता है यथा (दिग्मूढ़के स्यान्मृतिः) पहले ५ श्लोक से समान भूमि बनाकर उसमें १६ अंगुल के तुल्य (केपू) व्यासार्ध से (पू पूं प) वृत्त बनाना (१ क्षेत्र) तदनन्तर उसके



(के) केन्द्र विन्दु में १२ अंगुल का सूच्यग्र एक शंकु स्थापन करै प्रातः काल शङ्कु की छाया पश्चिमाभिमुख वृत्त के बाहर होगी अनन्तर ज्यों २ सूर्य ऊपर चढ़ैगा त्यों २ छाया छोटी होती जायगी यहाँ तक कि किसी समय उसका अग्र परिधि के प विन्दु में लगेगा उसको पश्चिम दिशा कल्पना करलो। दोपहर के बाद छाया पूरब की तरफ बढ़ैगी किसी समय में उसका अग्र परिधि के पूचिन्ह में लगेगा उसको पूर्व दिशा मानलो परन्तु यह पूर्व पश्चिम स्थूल होगा ॥६॥७॥

सूक्ष्मप्राचीसाधनं शालिन्याह ।

सू० कर्के कीटे गोमृगे यूकया सा द्वाभ्यां चाल्या सिंहकुम्भत्रिकेऽपि । यां वै काष्ठां भानुमान् याति तस्यां चाल्या द्वन्द्वेकार्मुके चालनं न ॥ ८ ॥

अ० कर्के कीटे गोमृगे यूकया सिंहकुम्भात्रिकेऽपि द्वाभ्यां सा चाल्या वै निश्चयेन भानुमान् यां काष्ठां याति तस्यां चाल्या द्वंद्वे कार्मुके चालनं नेति ॥ ८ ॥

सं. टी. कर्के कर्कसंक्रान्तौ कीटे वृश्चिकसंक्रान्तौ गोवृषोमृगोमकर-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तयोः संक्रान्तौ च यूकयैकया यूकया । सिंहः प्रसिद्धः कुम्भोऽपिप्रसिद्धस्तएव ताभ्यां त्रिकेऽर्थासिंहकन्यातुलकुम्भमीनमेषसंक्रान्तौ द्वाभ्यां यूकाभ्यां सा पूर्वसाधिता प्राची चाल्या स्थानान्तरं नेयेत्यर्थः । कस्यां दिशि चाल्येत्यतश्चालनदिशमाह । वै इति निश्चयेन भानुमात्रविर्या काष्ठां दिशं अयनवशेन याति गच्छति तस्यां दिशि चाल्या । किञ्च द्वंद्वे मिथुने कार्मुके धनुषि च चालनं न स्यात् ॥ ८ ॥

भा. भा. सूक्ष्मपूर्वापरज्ञान के लिये ६, ७ श्लोक से ज्ञात पू पूर्वविन्दु को कर्कवृश्चिक वृष मकरके सूर्य में १ यूका और सिंह कन्या तुल कुम्भ मीन मेष के सूर्य में २ यूका दक्षिणायन सूर्य में दक्षिण की तरफ उत्तरायण सूर्य में उत्तर की तरफ हटा देने से वास्तव पूर्वदिशा होती है। जैसे उत्तरायण सूर्य में पू पूर्व चिन्ह को उत्तर की तरफ हटा देने से पूं वास्तव पूर्व चिन्ह हुआ पश्चिम चिन्ह वही प वास्तव रहा पूं प रेखा पूर्वा पर रेखा हुई धन मिथुन के सूर्य में चालन नहीं है वहाँ स्थूल पूर्वापर को ही वास्तव पूर्वापर जानना ॥ ८ ॥

उदग्दक्षिणदिशोः साधनं शालिन्याह ।

मू० रज्जुं द्विघ्नां मध्यचिन्हां सपाशां प्राचीशङ्कौ पश्चिमे चापि दत्त्वा । कर्षेद्धीमान्दक्षिणे चोत्तरे च तच्चिन्हे स्याद्दक्षिणा चोत्तरादिक् ॥ ९ ॥

अ० धीमान् द्विघ्नां मध्यचिन्हां सपाशां रज्जुं कृत्वेति शेषः । प्राचीशङ्कौ च पुनः पश्चिमेऽपि दत्वा दक्षिणे च पुनरुत्तरे चकारान्निश्चयेन कर्षेत् । तच्चिन्हे दक्षिणा च पुनरुत्तरा दिक् स्यात् ॥ ९ ॥

सं.टी. धियोविद्यन्तेऽस्मिन्निति धीमान् बुद्धिमान् कुण्डमण्डपादि करणे यावान्विस्तारस्तद्विगुणितां यथा षोड़शहस्तमण्डपे द्वात्रिंशद्धस्तमितां मध्येऽर्धभागे चिन्हामङ्कितां सपाशां पाशद्वयोपेतां रज्जुं शड़कादिनिर्मितं डोरकमित्यर्थः कृत्वेति शेषः । तत्पाशद्वयं प्राच्यां पूर्वदिशि यः शङ्कुः कीलकस्तस्मिन् च पुनः पश्चिमे पश्चिमदिश्यपि शब्दाद्यः सङ्कुस्तस्मिन्दत्वा प्रोतं कृत्वा पूर्वाङ्कितार्धचिन्हं धृत्वेति शेषः दक्षिणे दक्षिणदिशि चात्पुनरुत्तरउत्तरदिशि चकारान्निश्चयेन कर्षेत् । तच्चिन्हे तदर्धाङ्कितभूमौ दक्षिणा च पुनरुत्तरा दिक् स्यात् ॥ ९ ॥

भा. भा. ८ वें श्लोक से साधित पूंप पूर्वापर रेखा को कर्त्तव्यमण्डप के विस्तार के बरावर दोनों तरफ बढ़ाकर जैसे यहां १६ हाथ का मण्डप बनाना है तो पश्चिम पं चिन्हतक पूरब पूं' चिन्हतक १६ हाथ के बरावर पूं पं रेखा करके (१ क्षे०द्र) उक्त दोनों चिन्हों पर दो खूंटी गाड़ देना अनन्तर विस्तार की दूनी याने ३२ हाथ की एक रस्सी लेकर उसके आधे में म चिन्ह कल्पना करना और उसके दोनो छोरोंपर दो पाश (ग्रन्थि विशेष) बनाकर दोनों खूंटियों में बान्धकर म चिन्हको पकड़कर उत्तर की तरफ खींचने से जहाँ पर जमीनमें म चिन्ह लगे वहां उ उत्तर चिन्ह और इसी तरह दक्षिण की तरफ खींचने से द दक्षिण चिन्ह कल्पना करना उ-द दक्षिणोत्तर रेखा हुई इन दोनों चिन्हां में भी दो खूंटियां गाड़ देना चाहिये ॥ ९ ॥

प्रकारान्तरेण दिक्साधनं वसन्ततिलकेनाह ।

मू० निशि वा श्रवणोदये दिगैन्द्री गुरुभस्योदयनेऽथ वन्हिभस्य । सुरवर्धकिवायुभान्तरालेऽप्यमुतः साधय पूर्ववच्च याम्याम् ॥ १० ॥

अ० वा निशि श्रवणोदये गुरुभस्योदयनेऽथ वन्हिभस्योदयने सुरवर्धकिवायुभान्तरालेऽपि ऐन्द्री दिक् च पुनरमुतः पूर्ववत् याम्यां साधयेत् ॥ १० ॥

सं. टी. वाथवा निशि रात्रौ श्रवणस्योदयो ऽर्थाद्दर्शने ऽथवा गुरुभस्य पुष्यस्योदयेऽथवा वन्हिभस्य कृत्तिकायादर्शनेऽथवा सुराणां देवानां वर्धकिस्त्वष्टा वायुः प्रसिद्धस्तयोर्भे चित्रास्वात्यौ तयोरन्तराले मध्ये ऐन्द्री दिगेतदुक्तं भवति दूरवीक्षणयन्त्रेण रात्रौ श्रवणस्य पुष्यस्य कृत्तिकायाश्चोदयं दृष्ट्वा तद्यन्त्रं स्थिरं कृत्वा तदग्राद्भूमौ लम्बं पातयेत् लम्बसूत्रे प्राचीदिक् । सुरवर्धकिवायुभान्तरालइत्यस्य वैशद्यार्थमग्रिमश्लोके द्रष्टव्यम् । चात्पुनरमुत ऐन्द्रीदिक्तः पूर्ववद्रज्जुं द्वि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घ्नामितिवच्यामयां दक्षिणदिशं साधयेदिति ॥ १० ॥

भा. भा. रात्रि में दूरवीन से श्रवण किम्वा पुष्य अथवा कृत्तिका नक्षत्र का उदय देखै जिस वक्त ये देख पड़े उस वक्त दूरवीन के अग्रभाग से जमीन पर लंव गिराने से जहां लंवमूल हो वही पूर्व दिशा होगी चित्रा स्वाती के अन्तर से भी पूर्व दिशा ज्ञात होती है जिसका वर्णन अग्रिमश्लोक में किया गया है अनन्तर इससे पूर्ववत् दक्षिण दिशा का साधन करना ॥ १० ॥

चित्रास्वात्योरन्तरतः कथं प्राचीसाधनमित्यस्योत्तरमनुष्टुभाह ।

मू० चित्रां विध्वैकया स्वातीमन्ययापि शलाकया ।
तिर्यक्स्थान्तरचिन्हात्तु द्विमूले स्यात्स्फुटेन्द्रदिक् ॥११॥

अ० तु पुनः द्विमूले दत्तदृष्टिर्द्रष्टेति शेषः । एकया शलाकया चित्रामन्यया स्वातीमपि विध्वा तिर्यक्स्थान्तरचिन्हात् लम्बपातेनेति शेषः स्फुटा इन्द्रदिक् स्यात् ॥ ११ ॥

सं. टी. तु पुनः द्वयोः शलाकयोर्मूले दत्तदृष्टिर्द्रष्टेति शेषः एतदुक्तं भवति समभूमौ दृष्ट्युच्छ्रायमितस्तम्भोपरोष्टदारुनिर्मितयोस्तुल्यशलाकयोश्चैकैकमग्रं लौहकण्टकादिना सिथिलं यथा भवति तथा जटितं कृत्वा तत्र दृष्टिं निधायैकया चित्रामन्यया स्वातीं विध्वा ते तत्र स्थिरीकृत्य तयोरपरप्रान्तद्वयमध्ये तिर्यक्स्था तिरश्चीनस्था यान्यशलाका तस्याअन्तरे मध्ये याच्चिन्हं तस्माद्भूमौ लम्बपातेन लंबमूले स्फुटा स्पष्टेन्द्रदिक् प्राचीदिक् स्यादिति ॥ ११ ॥

भा. भा. अपने दृष्टि के ऊचाई के वरोवर ऊंची त्रिपाई पर दो शलाका इस चाल से रखो कि जिधर को चाहैं घुमा सकैं तदनन्तर उक्तस्थानपर दृष्टि रखकर शला का अग्र में चित्रा को दूसरे के अग्र में स्वाती को वेध करके दोनों शलाकाओं को स्थिर करके अग्रभाग के मध्य में दूसरा शलाका रखकर उसके मध्य चिन्ह से भूमि पर लंव गिराने से जहां गिरे वहां पूर्व विन्दु समझना ॥ ११ ॥

अनुष्टुपजात्योदग्दिशमाह ।

मू० दिनमानदले सप्ताङ्गुलच्छायाग्रतोहि यत् ।
शङ्कुमूले नीयमानं सूत्रं स्यादुत्तरा दिशा ॥ १२ ॥

अ० हीति निश्चयेन दिनमानदले सप्ताङ्गुलच्छायाग्रतः शङ्कुमूले-नीयमानं यच्छूत्रं सोत्तरा दिशा स्यात् ॥ १२ ॥

सं. टी. हीति निश्चयेन दिनमानस्य दिनस्य दलेऽर्धेऽर्थान्मध्यान्हे स्थापितस्य सप्ताङ्गुलस्य शङ्कोर्या छाया तदग्रतस्तस्याः छायायाअग्रबिन्दुतः शङ्कोर्मूले तले नीयमानं प्राप्यमानं यत्सूत्रं सैवोत्तरा दिशा स्यादेतदुक्तं भवति घटिकादियन्त्रेण मध्यान्हसमयं ज्ञात्वा तदा शङ्कुच्छायैव दाक्षिणोत्तरा स्यादेवेत्यत्र शङ्कुमानकल्पनायां नियमो नास्तीति ज्ञेयम्॥१२॥

भा. भा. जिस किसी दिन को मध्यान्ह काल में छाया ठीक दक्षिणोत्तरा होती है यहां शंकुमान कल्पना में कोई नियम नहीं है ॥ १२ ॥

एवं दिक्साधनमभिधाय मण्डपस्य चतुष्कोणत्वात्तत्साधनं विपरीताख्यानक्याह ।

मू० दिगन्तशङ्कुद्वयगं द्विपाशं विस्तारतुल्यं तु गुणं दलाङ्कयम् । कोणे प्रकर्षेदिति वेदकोणेष्वेवं चतुष्कोणमतीव साधु ॥ १३ ॥

अ० द्विपाशं विस्तारतुल्यं दलाङ्कयं गुणं विधायेति शेषः । तु पुनः दिगन्तशङ्कुद्वयगं कृत्वेति शेषः । कोणे प्रकर्षेत् इति वेदकोणेषु एवमतीव साधु चतुष्कोणं स्यादिति ॥ १३ ॥

क्षेप. परमदिनादिनोद्भवान्तरालं शरगुणितं च हृतं रसैर्द्युतिः स्यात । समकुगतनरे नगाङ्गुले त्विट् समगतया स्वभया भवेदुदीची ॥

जिसदेश में जिस दिन मध्यान्ह काल में ७ अंगुलशंकु की छाया निकालनी हो उस देश में जितना परम दिनमान होता है उसका तथा इष्ट दिन का अन्तर करके उसे ५ से गुणा कर ६ से भाग देने से छाया का प्रमाण होता है परन्तु यह व्यर्थ है क्योंकि श्लोक के अन्तिम पाद में लिखते हैं कि समान भूमि पर जो मध्यान्हच्छाया है वही दक्षिणोत्तरा रेखा होती है यही १२ वीं श्लोक में वर्णित है इस लिये यह श्लोक क्षेपक प्रतीत होता है ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सं. टी. द्वौ पाशौ ग्रन्थिविशेषौ यस्मिन्तत्तथाभूतं तथा विस्तारः क्षेत्रस्य विस्तारोयथा षोड़शहस्तमण्डपस्य षोड़शैव विस्तारस्तत्तुल्यं दलाङ्कयमर्धभागाङ्कितं गुणं सुडोरकं विधायेति शेषः । तु पुनः दिशि तस्या अन्ते चरमादिशि च (अन्तोजघन्यं चरममित्यमरः) यथा पूर्वदिशोऽनुलोमगणनयोत्तरा चरमा विलोमगणनया दक्षिणैवमन्यत्रापि बोध्यम् । तत्र यच्छङ्कुद्वयं तद्गं पाशद्वयं कृत्वेति शेषः पूर्वाङ्कितार्धचिन्हं धृत्वा कोणे साध्यकोणे प्रकर्षेदाकर्षेत् यत्रार्धचिन्हं पतति तत्रैव साध्याविदिक् इतीत्थं वेदकोणेषु चतुर्ष्वपि कोणेषु क्रिया कार्यैवं कृतेऽतीव साधु स्फुटं चतुष्कोणं भवतीति ॥ १३ ॥

भा. भा. ६ वी श्लोक से दिशाओं का ज्ञान हो चुका अब कोणसाधन के लिये विस्तार के बराबर याने १६ हाथ का एक सूत्र लेकर उक्त रीति से उस के आधे में म चिन्ह कल्पना करके और दोनों छोरों पर दो पाश बना कर पूरब उत्तर के खूटियों में वान्धकर म चिन्ह को पकड़ कर बाहर खीचने से जहां म चिन्ह जमीन में लगै वहां ईशान कोण एवं पूरब दक्षिण से अग्निकोण दक्षिण पश्चिम से नैऋत्य कोण और पश्चिम उत्तर से वायुकोण जानना ।

हर एक कोणों में कीलारोपण करके सूत्र वान्धने से चतुष्कोण मण्डप होजायगा इसी तरह कुण्डों में भी जानना ॥ १३ ॥

मण्डपे विशेषं शालिन्याह ।

मू. उच्चां भूमिं मण्डपस्य प्रकुर्य्याद्धस्तोन्मानामर्धहस्तोन्मितां वा । मध्ये भूमिं मण्डपेनोन्मितां च त्यक्त्वा कुर्य्यान्मण्डपश्चेद्द्वितीयः ॥ १४ ॥

अ० हस्तोन्मानां वार्धहस्तोन्मितां मण्डपस्योच्चां भूमिं प्रकुर्य्यात् । च पुनश्चेत् द्वितीयोमण्डपः कर्त्तव्यस्तदा मध्ये मण्डपेनोन्मितां भूमिं त्यक्त्वा मण्डपं कुर्य्यात् ॥ १४ ॥

सं. टी. हस्तोन्मानां हस्तमितां वार्धहस्तोन्मितां द्वादशाङ्गुलपरिमितां मण्डपस्योच्चामुन्नतां भूमिं प्रकुर्य्यात् । तथोक्तं कपिलपञ्चरात्रे-उच्छ्रायोहस्तमानं स्यात्सुसमं च सुशोभनमिति । सिद्धान्तशेखरे-स्थलादर्काङ्गुलोच्छ्रायं मण्डपस्थलमीरितमिति । च पुनश्चेद्यदि द्वितीयोऽन्योमण्डपोऽर्थात्प्रधानमण्डपापेक्षयाऽन्योमण्डपश्चेत्कर्त्तव्यस्तदा मध्ये प्रधानकर्त्तव्यमण्डपयोर्मध्ये मण्डपेन प्रधानमण्डपेनोन्मितां तुल्यां भूमिं त्यक्त्वा मण्डपं कुर्य्यात् । तथोक्तं वास्तुशास्त्रे-मण्डपान्तरमुत्सृज्य कर्त्तव्यं मण्डपान्तरमिति ॥ १४ ॥

भा. भा. मण्डप प्राकृत भूमि से १ हाथ किम्वा आधा आधा हाथ ऊँचा बनाना चाहिये यदि द्वितीय मण्डप बनाना हो तो दोनों के मध्यमें प्रधान मण्डप के वरावर जमीन छोड़ना चाहिये ॥ १४ ॥

मण्डपप्रमाणं वसन्ततिलकेनाह ।

मू. दशसूर्यकरोन्मितोऽधमः स्यादिनशक्रप्रमितैः करैस्तु मध्यः । धृतिभूपकरोन्मितोवरीयान्नखहस्तोऽप्यथ मण्डपस्तुलायाम् ॥ १५ ॥

अ० दशसूर्यकरोन्मितोऽधमः इनशक्रप्रमितैः करैस्तु मध्यः धृतिभूपकरोन्मितोवरीयान् स्यात् । अथ नखहस्तोऽपीति निश्चयेन तुलायां मण्डपः स्यादिति ॥ १५ ॥

सं. टी. (दशप्रसिद्धाः सूर्योद्वादशैतन्मितोमण्डपोऽधमः स्यात् । तु पुनरिनो द्वादश शक्रश्चतुर्दशैतत्प्रमितैस्तुल्यैः करैर्हस्तैर्मध्यो नातिनिकृष्टोनाप्युत्तमः स्यात् । धृतिरष्टादशभूपाः षोड़शैनत्करैरुन्मितस्तुल्योमण्डपोवरीयानुत्तमः स्यात् । अथ नखहस्तोविंशतिहस्तमितोमण्डपोऽपि निश्चयेन तुलायां तुलादाने भवतीति[1] तथोक्तं लिङ्गपुराणे दशद्वादशहस्तौ च द्विद्विवृध्या ततः क्रमात् । विंशद्धस्तप्रमाणेन मण्डपं कूटमेव वा । तथा-

---

१ कुण्डरत्नावल्यां

यदि चे द्यरोऽपिस्यात्पूर्वतुल्यान्तरे न्यसेत् । स्नानमण्डपंतत्रैव ।
श्रेष्ठेऽर्धेनाग्न्यंशमानेन मध्येह्यल्पे वेदांशेनच स्नापनार्थम् । पूर्वात्कुर्यान्मण्डपाच्चोत्तरस्यां तस्मादर्धां कारुशालां ततश्च । स्नानवेदीतत्रैव ।
प्रतिष्ठायां द्वयं तच्चप्राच्यां तस्मिंश्च वेदिकाः ।
त्रिस्रोहस्तेन दीर्घाः स्युस्ततश्चांघ्रिमितोच्छ्रिताः ॥

१—कु. र. तुलादाने नखैर्वापिधृतिभिर्वानृपैश्चसः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वादशहस्तेन कलाहस्तेन वा पुनः । पञ्चरात्रेऽपि कनीयान् दशहस्तः स्यान्मध्यमो द्वादशोन्मितः । तथा षोडशभिर्हस्तैर्मण्डपः स्यादिहोत्तमः । ननु मण्डपेषु हस्तगत्या कथमुत्तमाधमतोक्तेत्याशङ्काम्परिहरन्नुच्यते लघुमण्डपे नवकुण्डीपक्षे पञ्चमेखलापक्षे चाचार्याद्युपवेशनं वास्तविकी कुण्डरचना च न सम्भवत्यतस्तत्राधमत्त्वमेवं यत्र सकोचेन कुण्डरचना निवासश्च तेषां तत्र मध्यमत्त्वं यत्र च सुखेन कुण्डरचना निवासश्च तत्रोत्तमत्त्वमुक्तमाचार्य्यैः । उत्तमोऽपि मण्डपोरत्न्यरत्न्यैकहस्तमितैकमेखलापक्षएवादरणीयः । उत्तमेऽपि मण्डपे दशहस्तकुण्डस्यनवपञ्चमेखलापक्षस्य समावेशोन स्यादतो मण्डपस्य वृद्धिरुक्ता मन्त्रमुक्तावल्यां चतुर्विंशद्धस्तपर्यन्तं मण्डपस्य वृद्धिरिति । वास्तुशास्त्रेऽपि पञ्चहस्तमारभ्य द्वात्रिंशद्धस्तपर्यन्तं वृद्धिरुक्ता कर्मविशेषे ग्रन्थविस्तरभयान्न लिख्यतइति ॥ १५ ॥

भा. भा. १० हाथ और १२ हाथ का मण्डप अधम तथा १२ हाथ और १४ हाथ का मध्यम और १६ हाथ तथा १८ हाथ का मण्डप उत्तम होता है। तुलादान में २० हाथ का मण्डप बनाना चाहिये ॥ १५ ॥

द्वारमानं मध्यवेदीमानञ्चाख्यानक्याह ।

मू० दिगन्तराले द्विकरं भवेद्द्वाश्चतुष्टयं वेदगजाङ्गुलैस्ततः ।
विवर्धितं मध्यवरिष्ठयोः स्याद्वेदी त्रिभागेन समाकरोच्चा १६

अ० दिगन्तराले द्विकरं चतुष्टयं द्वाः भवेत् । तद्द्वाः मध्यवरिष्ठयोः वेदगजाङ्गुलैर्विवार्धितं स्यात् त्रिभागेन समाकरोच्चा वेदी कार्या ॥ १६ ॥

सं. टी. दिशः पूर्वदक्षिणपश्चिमोत्तरास्तासामन्तराले मध्ये करयोर्द्वयमिति द्विकरं युग्महस्तामितमित्यर्थः चतुष्टयं चतुःसंख्याकं द्वाः द्वारं भवेत् । तद्द्वारचतुष्टयं मध्यवरिष्ठयोर्मध्यमोत्तमयोर्मण्डपयोः क्रमेण वेदाश्चत्वारोगजाअष्टौ तत्तुल्याङ्गुलैर्विवर्धितं स्यात् तद्यथा कनिष्ठमण्डपे द्विहस्तं मध्यमे चतुरङ्गुलाधिकहस्तद्वयमुत्तमेऽष्टाङ्गुलाधिकहस्तद्वयमिति । त्रिभागेन मण्डपस्य तृतीयांशेन समार्थान्मण्डपे तुल्यनवकोष्ठे कृतेमध्यकोष्ठसमानाकारोच्चैकहस्तोच्छ्रिता वेदी मध्यवेदी कार्य्येति । तथोक्तंपञ्चरात्रे कनिष्ठे द्विकरं द्वारं चतुरङ्गुलवृद्धितः । मध्यमोत्तमयोर्वेदी मण्डपस्य त्रिभागत इति । क्रियासारेऽपि त्रिभागं मण्डपं कृत्वा मध्यभागे तु वेदिका हस्तमात्रं तदुत्सेधं चतुरस्रं समन्ततइति । सिद्धान्तशेखरे तु विशेषः वेदी चतुर्विधा प्रोक्ता चतुरस्रा च पद्मिनी श्रीधरी सर्वतोभद्रा दीक्षासु स्थापनादिषु । चतुरस्रा चतुष्कोणा वेदी सर्वफलप्रदा । तडागादि प्रतिष्ठायां पद्मिनी पद्मसन्निभा । राज्ञां स्यात्सर्वतोभद्रा चतुर्भद्राभिषेचने । विवाहे श्रीधरी वेदी विंशत्यस्रसमान्विता । दर्पणोदरसंकाशा निम्नोन्नतविवर्जितेति १६

भा. भा. प्रति दिशाओं में निकृष्ट मण्डप में दो हाथ मध्यम में दो हाथ चार अंगुल उत्तम में दो हाथ ८ अंगुल चौड़ा दरवाजा बनाना सब ४ द्वार हुये । मण्डप का समान नव कोष्ठ बनाने से मध्य कोष्ठ के बराबर चतुष्कोण एक हाथ उंची मध्य वेदी बनाना चाहिये यही प्रधान वेदी कहलाती है॥ १६॥

तुलापुरुषदाने विशेषं विपरीताख्यानक्याह ।

मू. तुलाप्रदानेऽधममध्ययोः स्यात्सा पञ्चहस्तोत्तमकेऽद्रिह-

---

१ सर्वतोभद्रा–वेदीफलं स्वाब्धिकराशंकेनाष्टघ्नेनयुक्तं च पुनर्द्विनिघ्नं तन्मूलमित्यावलयन्तु वेदिस्थलस्य मध्यात्प्रविधेहि तस्मिन् । दिक्कोणकं वारिधिकोणमेकं तस्मिन्विकाष्ठास्रकमब्धिकोणं विधाय चाद्यस्य भुजांघ्रिचिन्हात्सूत्रं च संलग्नभुजांघ्रिचिन्हात् बाह्यार्धकोष्ठभ्रमिमार्जनेन स्यात्सूर्यकोणा किल भद्रिकैवं ।

श्रीधरी–वेदीफलं स्वाभ्ररसांशकेनार्कघ्नेनयुक्तं च पुनर्द्विनिघ्नं । तन्मूलमित्यादिविदिक्स्थकोणवेदास्रकान्तं तनुयाच्चतश्च । आद्याब्धिकोणस्यभुजार्धमत्रत्रेधाविभज्यापिच सूत्रपातात् । पूर्वोक्तवच्छ्रीधरी वेदिरत्र भवेन्नखास्रा नयनाभिरामा ।

पद्मिनी–वेद्याः फलं भूमिसमुद्रनिघ्नं वेदाक्षिभिस्तद्विभजेच्चलब्धेः । मूलं व्यासः पद्मिनीवेदिकायाः सादिकोणा पद्मकुण्डोक्तवत्स्यात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्ता । ईशान भागे ग्रहैर्वेदिका तु हस्तोन्मितोच्छ्रायवती त्रिवप्रा ॥ १७ ॥

अ० तुलाप्रदानेऽधममध्ययोः सा पञ्चहस्ता उत्तमकेऽद्रिहस्ता स्यात् । तु पुनरीशानभागे हस्तोन्मितोच्छ्रायवती त्रिवप्रा ग्रहवेदिकास्यात् ॥ १७ ॥

सं. टी. तुलाप्रदाने तुलापुरुषदानेऽधममध्ययोर्मण्डपयोः सा मध्यवेदी पञ्चहस्ता पञ्चहस्तपरिमिता उत्तमके उत्तमे मण्डपेऽद्रिहस्ता सप्तहस्तमिता स्यात् । तथोक्तं मात्स्ये[1] । पञ्चहस्ता भवेद्वेदी सप्तहस्ताथवा भवेत् । तु पुनरीशानभागे मण्डपस्येशानकोणे हस्तोन्मितोच्छ्रायवती हस्तैकमितायामदैर्घ्योच्छ्राययुता तथा त्रीणि वप्राणि प्राकाराणि सोपानानीति यावत् यस्यां सा तथा भूता ग्रहार्थं वेदिका स्यादिति ॥ १७ ॥

भा. भा. तुलादान में अधम मध्यम मण्डप में प्रधान वेदी ५ हाथ की और उत्तम मण्डप में ७ हाथ की वनानी चाहिये ।
सभी मण्डप में मण्डप के ईशान कोण में एक हाथ लंवी चौड़ी तथा ऊँची जिसके चारो तरफ ३ सोपान हों ऐसी ग्रहवेदी वनाना ॥ १७ ॥

स्तम्भनिवेशनं भुजंगप्रयातशालिनीभ्यामाह ।

मू. समत्रित्रिभागे च सूत्रं प्रदद्यादुदग्दक्षिणं चापि पूर्वापरञ्च ।
ततस्त्र्यंशपूर्त्तौ च कोणेषु दद्यात्समस्तम्भकान्द्वादशैवेषु हस्तान् ॥ १८ ॥
वेद्याः कोणे हस्तिहस्तोच्चवेदस्तम्भान्वह्निदिक्तः (दद्यात्) सचूडान् । प्रादक्षिण्यात्पञ्चमांशन्तु भूमौ दद्यादेवं षोड़शस्तम्भसंस्थाः ॥ १९ ॥

अ० चात्पुनः समत्रित्रिभागे उदग्दक्षिणं चकारादेवं पूर्वापरमपि चपादपूरणं सूत्रं प्रदद्यात् । ततस्त्र्यंशपूर्त्तौ च पुनः कोणेषु इषुहस्तान् द्वादशएव समस्तम्भकान् दद्यात् । सचूडान् हस्तिहस्तोच्चवेदस्तम्भान् वन्हिदिक्तः प्रादक्षिण्यात् वेद्याः कोणे दद्यात् । तु पुनः पंचमांशं भूमौ दद्यादेवं षोड़शस्तम्भसंस्था स्यादिति ॥ १८ ॥ १९ ॥

सं. टी. चात्पुनः समेषु तुल्येषु त्रिषु त्रिषु भागेष्वर्थान्मण्डपस्य विस्तारे त्रिधा विभक्ते प्रतिभागाष्वित्यर्थः। उदग्दक्षिणमुत्तरचिन्हमारभ्य दक्षिणचिन्हपर्यन्तमेवं पूर्वापरं पूर्वचिन्हमारभ्य पश्चिमचिन्हपर्यन्तमपि प्रकर्षेण स्फुटरूपेण सूत्रं दद्यात् एवं कृते नवकोष्ठात्मकोमण्डपोभवति । ततस्तदनन्तरम् । त्र्यंशस्य त्रिभागस्य यत्र पूर्तिः समाप्तिः सा च प्रतिदिशं द्विसंख्यकैवं चतुर्दिक्ष्वष्टौ त्र्यंशपूर्त्तयस्तास्वष्टौ स्तम्भाः । चात्पुनः कोणेषु चतुर्षु चत्वारस्तम्भाएवमिषुहस्तान्पञ्चहस्तपरिमितान्द्वादश समस्तम्भकान्तुल्यपरिमाणकान् दद्यादारोपयेत् । अपि च सचूडान् सशिखान् हस्तिभिरष्टभिर्हस्तैरुच्चाँस्तथावेदस्तम्भान् चतुरः स्तम्भान् वन्हिदिक्तोऽग्निकोणात् प्रादक्षिण्यात्प्रदक्षिणक्रमेण वेद्यामध्यवेद्याः कोणे दद्यादारोपयेत् । तेषामुक्तस्तम्भानां पञ्चमांशन्तु भूमौ निखनेदिति शेषः । एवं षोड़शानां स्तम्भानां संस्था संस्थापनं स्यादिति । तथोक्तं शारदातिलके । षोड़शस्तम्भसंयुक्तं चत्वारस्तेषु मध्यमाः । अष्टहस्तसमुच्छ्रायाइति। पञ्चरात्रेपि । मण्डपार्धोच्छ्रितान्वेदसंख्यांश्चूडासमन्वितान् । स्तम्भान्समं च संस्थाप्य स्तम्भद्वादशकंपुनरिति । यद्यप्यत्र मण्डपार्धोच्छ्रितानित्युक्तं तथापि षोड़शहस्तमण्डपस्य मुख्यत्वादष्टहस्तोच्छ्रिताएव स्तम्भामुख्यत्वेनाचार्यैः स्वीकृताइति ॥ १८ ॥ १९ ॥

१–मात्स्ये–आग्नेय्यां मातृकावेदी वास्तुवेदी च नैऋते क्षेत्रपालस्य वायव्यामीशान्यांच नवग्रहाः । अथ प्रधानादपि यत्र पूर्वं ग्रहाधिवासश्च तदा प्रधाने ईशानदेशेचततस्त्ववाच्यां श्रीखेटवेदी करविस्तृतोच्चा ।
२–तत्रैव–द्विरङ्गुलोच्छ्रितोवप्रः प्रथमः सउदाहृतः अङ्गुलोच्छ्रायसंयुक्तं वप्रद्वयमथोपरि द्व्यङ्गुलस्तत्रविस्तारः सर्वेषां कथितोवुधैः ।
३–स्तम्भस्स्थौल्यं शाति । दशाङ्गुलप्रमाणेन तत्परीणाहईरितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भा. भा. मण्डप के विस्तार के बराबर सूत्र लेकर इसे (त्रिगुण) तेहरा करके उससे एक कोण से दूसरे कोण तक नापने से विस्तार का समान ३ भाग हो जायगा हर एक भाग में पूरब से पच्छिम तक तथा दक्षिण से उत्तर तक सूत्र देने से मण्डप का समान ६ कोष्ठ हो जायगें मध्य कोष्ठ में मध्यवेदी करना।

मण्डप के हर एक त्रिभाग के पूर्त्ति में एक एक स्तम्भ तथा कोणों में भी एक एक स्तम्भ कुल १२ स्तम्भ चूड़ा के सहित पांच २ हाथ का और मध्यवेदी के चारों कोणों में ४ स्तम्भ चूड़ा के सहित ८ हाथ का अग्नि कोण से प्रदक्षिण क्रम से स्थापन करै सब स्तम्भों का पांचवा भाग जमीन में गाड़ना चाहिये ॥ १८ ॥ १९ ॥

स्तम्भोपरि काष्ठनिवेशनामिन्द्रवज्रयाह ।

मू० स्तम्भेषु तीर्यग्वलिकानिधेयाश्चूडासु कर्णेष्वथवा बहिस्ताः । पूर्वापरं दक्षिणसौम्यदिक्स्थं कोणेऽन्तरा काष्ठचयं निदध्यात् ॥ २० ॥

अ० स्तम्भेषु चूडास्वथवा कर्णेषु बहिस्तास्तिर्यग्वलिकानिधेयाः । तत्पूर्वापरं दक्षिणसौम्यादिक्स्थं स्यात कोणेऽन्तरा काष्ठचयं निदध्यात् ॥ २० ॥

सं.टी. स्तम्भेषु चतुर्षु वेदिस्तम्भेषु द्वादशसु मण्डपस्तम्भेषु च चूडासु शिखासु अथवा कर्णेषु श्रवणेषु बहिरेव बहिस्ताः किञ्चिद्बहिर्गताः तीर्यक् तिरश्चीनं यथास्यात्तथा वालिकाः स्तम्भोपरि तीर्यग्निहितकाष्ठस्य वलिकेतिसंज्ञा निधेयाः स्थाप्याः । तद्वलिकाकाष्ठं पूर्वापरं द्वयं दक्षिणसौम्यदिक्स्थं च द्वयमेवं चतुष्टयं स्यात् । कोणेऽग्निवाय्वोर्निऋतीशानयोश्चान्तरान्यत्काष्ठचयं काष्ठसमूहं मण्डपं यथा दृढं स्यात्तथा निदध्यात्स्थापयेत् ॥ २० ॥

भा. भा. स्तम्भों के ऊपर चूर अथवा कन्ना में तिरछा वलिका (दाशा) स्थापन करैं दो वलिकाये उत्तर दक्षिण और दो पूरब पश्चिम एवं ४ वलिकायें जिनकी लम्बाई मण्डप के विस्तार से कुछ बड़ी हो और ४ वलिकाये मध्यवेदी के खम्भो पर जिनकी लम्बाई मध्यवेदी के विस्तार से कुछ बड़ी हो ।

तथा मण्डपको दृढ़ करने के लिये कोणो में और भी यथेष्ट काष्ठों को लगाना ॥ २० ॥

मध्यभागाच्छादनं रथोद्धतयाह ।

मू. मध्यभागशिखरं रचयित्वा छादयेदपि कटैर्ऋजुवंशैः । द्वारवर्जमिहमण्डपमेनं स्तम्भकानपि सुवस्त्रसमूहैः॥२१॥

अ० मध्यभागशिखरं रचयित्वा कटैः ऋजुवंशैरपीह द्वारवर्जमेनं मण्डपं छादयेत् । सुवस्त्रसमूहैः स्तम्भकानपि छादयेत् ॥२१॥

सं.टी. मध्यभागे मण्डपस्य मध्ये शिखरं शृङ्गं । कूटोऽस्त्री शिखरं शृङ्गमित्यमरः । रचयित्वा कृत्वा कटैः ऋजुवंशैः सरलवंशैरपीहात्र द्वारवर्जं द्वाररहितमित्यनेनाभिनोऽपि छादनं सूचितं येन शूद्रादिदृष्टिदूषितं कर्म न भवेत् छादयेत् । सुवस्त्रसमूहैः वस्त्राद्यलङ्कारकवस्तुजातैः स्तम्भकानपि छादयेदलङ्कुर्यादित्यर्थः । तथाह क्रियासारे । नारिकेलदलैर्वापि पल्लवैर्वापि वेणुभिः । आच्छाद्यामण्डपाः सर्वे द्वारवर्जन्तु सर्वत इति । वास्तुशास्त्रे । कटैः सद्भिस्तु संछाद्या विजयाद्यास्तु मण्डपा इति । हयग्रीवपञ्चरात्रे । दर्पणैश्चामरैर्घण्टैः स्तम्भान्वस्त्रैर्विभूषयेदिति ॥ २१ ॥

भा. भा. मण्डप के ऊपर मध्यभाग में शृङ्गाकार गुंवज बनाकर समस्त मण्डप को चटाइयों से अथवा फूस तथा सरल वंश से छायदेना दिशाओं के ४ दरवाजों को छोड़ शेष मण्डपको भी चटाइयों से घेर देना और समस्त खम्भों में रंगीन वस्त्र लपेट देना ॥ २१ ॥

वसन्ततिलकया तोरणान्याह ।

मू. पूर्वादि दिक्षु रचयेदपि तोरणानि न्यग्रोधजन्तुफलपिप्पलवृक्षराजैः । अश्वत्थजन्तुफलपर्कटिभूरिपद्भिर्वैषामभावत इमान्यथवैककेन ॥ २२ ॥

अ० पूर्वादिदिक्षु न्यग्रोधजन्तुफलपिप्पलवृक्षराजैः वाश्वत्थजन्तुफलपर्कटिभूरिपद्भिः तोरणान्यपीति निश्चयेन रचयेत् । अथवैषामभावतइमान्येककेन रचयेत् ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सं.टी. पूर्वादिदिक्षु पूर्वदक्षिणपश्चिमोत्तरेषु क्रमेण न्यग्रोधो वटः जन्तुफलमौदुंबरः पिप्पलः प्रसिद्धः वृत्तराजःप्लक्षएभिर्वाश्वत्थः पिप्पलः । बोधिद्रुमश्चलदलः पिप्पलः कुंजराशनः। अश्वत्थ इत्यमरः।जन्तुफलमौदुंबरः । उदुम्बरोजन्तुफलमित्यमरः। पर्कटिःप्लक्षः।प्लक्षोजटीपर्कटिःस्यादित्यमरः।भूरिपाद्वटः। न्यग्रोधोबहुपाद्वट इत्यमरः । एभिस्तोरणानि द्वारविशेषाण्यपि निश्चयेन रचयेत् । तथोक्तं महाकापिलपंचरात्रे । देवास्तोरणरूपेण संस्थितायज्ञमण्डपे । विघ्नविध्वंशनार्थाय रक्षार्थमध्वरस्य च । न्यसेन्न्यग्रोधमैन्द्र्यान्तु याम्यां चौदुम्वरं तथा । वारुण्यां पिप्पलं चैव कौबेर्यां प्लक्षजं न्यसेत् । अश्वत्थोदुम्बरप्लक्षवटशाखाकृतानि च । मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत् । अथवैषामुक्तकाष्ठानामभावतोऽलाभात्तदेकतमेनेमानि तोरणानि रचयेत् । तथोक्तं पंचरात्रे । अलाभेष्वेकमेवैषां सर्वाशासु निवेशयेदिति ॥ २२ ॥

भा. भा. पूरब में वट या पीपल दक्षिण में गूलर पश्चिम में पीपल या पाकर उत्तर में पाकर या वट अथवा अभाव में उक्त वृक्षों में किसी वृक्ष के काष्ठ का तोरण (द्वारविशेष) २३ श्लोक के अनुसार बनाकर स्थापन करै ॥ २२ ॥

तोरणमानं तन्निवेशनं च विपरीताख्यानक्याह ।

मू० हस्ताद्बहिर्मण्डपतः शराङ्गस्वरैः करैस्तान्यधमादिकेषु । दीर्घाणि चप्राहुरथायतिःस्यात्तेषां द्विहस्ता चरणप्रवृध्या २३

अ० मण्डपतोहस्ताद्बहिः च पुनः अधमादिकेषु तानि शराङ्गस्वरैः करैर्दीर्घाणिप्राहुराचार्या इति शेषः । अथ चरणप्रवृध्या द्विहस्ता तेषामायतिः स्यात् ॥ २३ ॥

सं. टी. मण्डपतोमण्डपद्वारतोहस्तादेकहस्ताद्बाहिरन्तरे चात्पुनः अधमादिकेषु अधममध्यमोत्तमेषु मण्डपेषु क्रमेण शराः पंच ५ अङ्गानि षट् ६ स्वराः सप्त ७ तन्मितैः करैर्हस्तैर्दीर्घाणि प्राहुराचार्या इति शेषः । तथा चाग्नेये । पंचषट्सप्तहस्तानि हस्तखाते स्थितानि चेति । अथ चरणश्चतुर्थांशोऽङ्गु-

ष्वादेकहस्तचतुर्थांशः षडङ्गुलं तस्य प्रवृध्या द्विहस्ता हस्तद्वयं तेषां तोरणानामायतिर्विस्तारः स्यात् एतदुक्तं भवति अधममण्डपे हस्तद्वयं मध्यमे षडङ्गुलाधिकं हस्तद्वयमुत्तमे सार्धहस्तद्वयमिति । तथोक्तं वास्तुशास्त्रे । पंचहस्त प्रमाणास्ते विस्तारेण द्विहस्तकाः । षडङ्गुलाभिवृध्या च सप्तहस्तास्तथोत्तमइति ॥ २३ ॥

भा. भा. प्रति तोरण में ३ काष्ठ होते हैं २ स्तम्भ और १ फलक (वलिका) अधम मण्डप में स्तम्भों की लंबाई चूड़ा के सहित ५ हाथ मध्यम में ६ हाथ और उत्तम में ७ हाथ की करना और स्तम्भों का आधा याने अधम में २ हाथ १२ अंगुल मध्यम में ३ हाथ उत्तम में ३ हाथ १२ अंगुल फलक की लंबाई करना ।

अनन्तर प्रतिदिशाओं में मण्डप के द्वार के सामने मण्डप वेदी से १ हाथ के दूरी पर दो दो स्तम्भ इस प्रकार गाड़ देवै जिससे उनके मध्य में अधम मण्डप में २ हाथ मध्यम में २ हाथ ६ अंगुल उत्तम में २ हाथ १२ अंगुल जमीन रहै ॥ २३ ॥

फलकादिनिवेशनमुपजातीन्द्रवज्राभ्यामाह ।

मू० स्तम्भार्धमानं फलकन्तु तीर्यङ्नवेशाविश्वप्रमिताङ्गुलाश्च । तन्मूर्न्धि कीलाः स्वतुरीयभागैस्ततास्तु शूलाकृतयश्च ते स्युः ॥२४॥ तद्वेशनं द्वित्रियुगाङ्गुलानि शैवे तु विष्णोर्यजनेङ्गुलर्द्धिः । कीलेषु शंखारिगदाम्बुजाङ्काण्विष्वंशरोपः किलतोरणेषु ॥ २५ ॥

अ० तु पुनः स्तम्भार्धमानं फलकं तीर्यग्निवेश्यमिति शेषः । चात्पुनस्तन्मूर्ध्नि नवेशाविश्वप्रमिताङ्गुलाः स्वतुरीयभागैस्तताः कीलानिवेश्याइत्यध्याहारः । तु पुनस्ते शूलाकृतयः स्युः । शैवे यजने द्वित्रियुगाङ्गुलानि तद्वेशनं स्यात् । तु पुन र्विष्णोर्यजनेऽङ्गुलर्द्धिः कार्येति शेषः । एवंतद्यध्याहारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शंखारिगदाम्बुजाङ्कषु कीलेषु तोरणेषु किलेष्वंशरोपः स्यादिति ॥ २४ ॥ २५ ॥

सं. टी. तु पुनः स्तम्भस्य तोरणस्तम्भस्यार्धेन मीयते तोल्यत इति स्तम्भार्धतुल्यमित्यर्थः फलकं स्तम्भोपरि तीर्यग्निहितकाष्ठस्य फलकमिति संज्ञा, तीर्यक् तिरश्चीनतया। निवेश्यमिति शेषः। तथोक्तं शारदातिलके। तीर्यक् फलकमानं स्यात्स्तम्भानामर्धमानत इति। चात्पुनस्तस्य फलकस्य मूर्धिन शिरस्यधमादिमण्डपक्रमेण नव प्रसिद्धाःईशाएकादश विश्वस्त्रयोदशैतत्प्रमिताङ्गुला दीर्घास्तथा स्वस्य दैर्घ्यस्य तुरीय भागैश्चतुर्थांशैस्तता विस्तृताः विसृतं विस्तृतं ततमित्यमरः। कीलकानिवेश्याइत्यध्याहारः। तुपुनस्ते कीलकाः शूलाकृतयः सूच्यग्राकृतय स्युरिति। तथोक्तं मन्त्रमुक्तावल्यां। अग्रयोर्मध्यभागे च पट्टिकायां त्रिशूलकमिति। पिङ्गलामते। शूलेन चिन्हिताः कार्याद्वारशाखास्तुमस्तके शूले नवाङ्गुले दैर्घ्ये तुरीयांशेन विस्तृतिः। ऋजु वै मध्यशृङ्गं स्यात्किंचिद्वक्रंतु पक्षयोः। प्रथमं तत्समाख्यातं द्व्यङ्गुलं रोपयेत्तथा। शेषाणां द्व्यङ्गुला वृद्धिर्वेशश्चाङ्गुलवृद्धितइति। शैवे यजने यज्ञे मण्डपक्रमेण द्वित्रियुगाङ्गुलानि प्रसिद्धानि तस्य कीलकस्य वेशनं फलके प्रवेशनं निखननमिति यावत्स्यात्। तु पुनः विष्णोर्यजने यागे शैवोक्तकीलकायामदैर्घ्यप्रवेशनष्वङ्गुलर्द्धिरङ्गुलवृद्धिः कार्येति शेषः। एतत्सर्वं चक्रेऽवलोक्यम्। पूर्वतइत्यध्याहारः शंखः प्रसिद्धोऽरिश्चक्रम् गदा दण्डविशेषोऽम्बुजं कमलमेभिरङ्केष्वाङ्कितेषु चिन्हितेष्विति यावत् कीलेष्वर्थाकीलोपलक्षितेषु तोरणेषु किल निश्चयेन, वास्तुशास्त्रे, मस्तके द्वादशांशेन शंखं चक्रं गदाम्बुजं प्रागादिक्रमयोगेन न्यसेत्तेषां स्वदारुजमिति। इष्वंशस्तोरणस्य पंचमांशोरोपोभूमौनिखननं स्यात्। पंचमांशं न्यसेद्भूमौ सर्वसाधारणोविधिरिति ॥ २४ ॥ २५ ॥

कीलक चक्रम् ।

	शैव यागे						विष्णु यागे					
मण्डप	दैर्घ्य		विस्तार		रोपण		दैर्घ्य		विस्तार		रोपण	
	अं	य	अं	य	अं	य	अं	य	अं	य	अं	य
अधम	९	०	२	२	२	०	१०	०	३	२	३	०
मध्यम	११	०	२	६	३	०	१२	०	३	६	४	०
उत्तम	१३	०	३	२	४	०	१४	०	४	२	५	०

भ. भा. स्तम्भ के आधे के बराबर जो फलक काष्ठ है उसे स्तम्भों के ऊपर तिरछा स्थापन करना। प्रतिफलक के दोनों छोरों तथा मध्य में एक एक कील सूच्यग्र उक्तकाष्ठों का बनाकर स्थापनकरना इसके स्थापन करने से तोरण का स्वरूप त्रिशूलाकार होजायगा कीलों की लम्बाई चौड़ाई इत्यादि चक्र से जानना पूरब के कीलों में शंख दक्षिण में चक्र पश्चिम में गदा उत्तर में कमल का चिन्ह बना देना ॥ २४ ॥ २५ ॥

ध्वजानिर्माणं विपरीताख्यानक्याह ।

मू. ध्वजान्द्विहस्तायतिकांश्च पञ्च हस्तान्सुपीतारुणकृष्णनीलान्। श्वेतासितश्वेतसितान्दिगीशवाहान्वहेद्दिक्करवंशशीर्षे ॥ २६ ॥

अ० द्विहस्तायतिकान् चात्पुनः पञ्चहस्तान् सुपीतारुणकृष्णनीलान् श्वेतासितश्वेतासितान् दिगीशवाहान् ध्वजान् दिक्कर वंशशीर्षे वहेत् ॥ २६ ॥

सं. टी. आयतिरेवायातिकः द्वौ हस्तावायतिकौ येषां तानर्थाद्धस्तद्वयविस्तृतान्। चात्पुनः पञ्चहस्तान् पंचहस्तदीर्घान् सुपीतः पीतोऽरुणोरक्तः कृष्णः प्रसिद्धोनीलश्वेतावपि प्रसिद्धौ अ-

१ कु. र.–सर्वेऽथवा बाहुमिताध्वजाः स्युः, सूर्याङ्गुलैरायतिकादशैव। पक्षे यदा- दिक् प्रमितास्तदातु रन्ध्रस्तु रक्तोदशमः सितश्च तथायोपताका ध्वजानां च तुल्यास्तदाकारवर्णा दशैवापि यत्र। तदा सर्ववर्णा तुरन्ध्रा प्रदिष्टा तथा पंचवर्णादशम्येवचस्यात्।, सुबोधिन्यां। यथाविभवतः कार्याः पूर्वाभावे पराःपराः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सितः कृष्णः श्वेतासितौ प्रसिद्धावेभिर्वर्णैरुपलक्षितान् । तथा दिगीशानामष्टानां ये वाहावाहनानि मातङ्गाजमहिषसिंहमत्स्यैणवाजिवृषभाश्तेषु तानर्थात्स्वस्ववाहाङ्कितान् ध्वजान् । तथोक्तं प्रतिष्ठासारसंग्रहे मातङ्गवस्तमहिषसिंहमत्स्यैणवाजिनः वृषभं च यथान्यायं ध्वजमध्ये क्रमाल्लिखेदिति । दिग्भिः करैस्तुल्योयोवंशस्तस्य शीर्षे मस्तके वहेत्स्थापयेदिति ॥ २६ ॥

भा. भा. पूर्वादिक दिशाओं में ८ दिक्पालों के वर्ण (१ पीला २ लाल ३ काला ४ नीला ५ श्वेत ६ काला ७ श्वेत ८ भी श्वेत) का और उनके वाहन (१ गज २ मेष ३ महिष ४ सिंह ५ मत्स्य ६ मृग ७ अश्व ८ वृष) से चिहित २ हाथ चौड़ा ५ हाथ लंबा ध्वजा १० हाथ के वंश में लगाकर गाड देवै ॥ २६ ॥

ध्वजपताकानिवेशनमिन्द्रवज्रानुष्टुब्भ्यामाह ।

मू० लोकेशवर्णास्त्रयुताः पताकाःशैलेन्दुदैर्घ्यायतिकाश्च मध्ये।
चित्रं ध्वजं दिक्करदैर्घ्यवंशे त्रिदोस्ततं प्रान्तगाकिंकिणीकम् ॥२७॥ श्वेतां च नवमीं पूर्वेशानयोर्मध्यतोबुधः ।
विन्यसेत्तु पताकांश्च ध्वजांस्तानपि पूर्वतः ॥ २८ ॥

अ० लोकेशवर्णास्त्रयुताः शैलेन्दुदैर्घ्यायतिकाः पताकाः कार्याः। च पुनः मध्ये प्रान्तगाकिंकिणिकिं त्रिदोस्ततं चित्रं ध्वजं दिक्करदैर्घ्यवंशे कार्यम्। चपुनः बुधः पूर्वेशानयोर्मध्यतोनवमीं श्वेतां पताकां विन्यसेत् । च पुनस्तान्ध्वजान्पताकांश्चापि पूर्वतोविन्यसेत् ॥ २७॥ २८ ॥

सं.टी. लोकेशानां दिगीशानां ये वर्णाः प्रागुक्ताः सुपीतादयो यानि चास्त्राण्यायुधानि वज्रशक्तिदण्डखड्गपाशाङ्कुशगदात्रिशूलानि ताभ्यां युताश्चिन्हितास्तथा शैलाः सप्तेन्दुरेकः एतत्प्रमितैर्हस्तैर्दैर्घ्यायातिकौ दैर्घ्यविस्तारौ यासां ताअर्थात्सप्तहस्तदैर्घ्याः हस्तैकविस्तृताः पताकाः । दशहस्तवंशशीर्षगाः कार्या इति पूर्वश्लोकेनाध्याहारः । चात्पुनर्मध्ये मण्डपस्य मध्येऽर्थाच्छिखरे प्रान्तगकिंकिणीकमुपान्तभागेस्थिताकिंकिणीकं त्रिभिर्दोर्भिर्हस्तैस्ततं विस्तृतमनुक्तत्वादेतावदेव दैर्घ्यं चित्रमनेकवर्णदुकूलनिर्मितं ध्वजं दिक्करदैर्घ्यवंशे दशहस्तवंशशीर्षे कार्यम् । चपुनः बुधस्तान् ध्वजान्पताकांश्चापि पूर्वतोविन्यसेत्स्थापयेदिति ॥ २७ ॥ २८ ॥

भा. भा. मण्डप के पूर्वादिक ८ दिशाओं में आठों दिक्पालों के उक्त वर्ण का उनके आयुधो (१ वज्र २ शक्ति ३ दण्ड ४ खड्ग ५ पाश ६ अंकुश ७ गदा ८ त्रिशूल) से चिन्हित ७ हाथ लम्बा १ हाथ चौड़ा पताका १० हाथ के वंश में लगाकर गाड़ देना । और इसी नाप का एक श्वेत पताका पूर्व ईशान के मध्य में स्थापन करना । तथा ३ हाथ लंबा चौड़ा एक बहुरंगी ध्वजा १० हाथ के बांस में लगाकर जिसके अग्रभाग में घुंघुरु मिला हो मण्डप के ऊपर शिखर पर लगा देवै ॥ २७ ॥ २८ ॥

मण्डपालङ्करणानि वदन्मण्डपकारयितृभ्यआशिषं शार्दूलविक्रीडितेनाह ।

मू० उद्यत्पत्रफलातिनम्रविलसद्रम्भाभिरालिङ्गितस्तम्भोऽनेकदलैरसालविटपैः सर्वत्र संवेष्टितः ।
राजच्चामरसम्भ्रवद्धमुकुराद्ञ्चद्वितानान्वितो
युक्तैःपुष्पफलैः फलाय भवतां भूयान्महामण्डपः ॥२९॥

अ० उद्यत्पत्रफलातिनम्रविलसद्रम्भाभिरालिङ्गितस्तम्भः। सर्वत्र रसालविटपैरनेकदलैः संवेष्टितः । राजच्चामरसम्भ्रवद्धमुकुराद्ञ्चद्वितानान्वितः । पुष्पफलैर्युक्तोमहामण्डपोभवतां फलाय भूयात् ॥ २९॥

सं.टी. उद्यन्त्युन्नतानि पत्राणि यासां तास्तथा फलैरतिनम्राअंत एव विलसन्त्यः शोभिता यारम्भाः कदल्यस्ताभिरालिङ्गितः कुक्षौ कृतः स्तम्भोयस्य सः तथा सर्वत्राभितोरसालानामाम्राणां ये विटपावृक्षास्तैरर्थात्तदुद्भवैरनेकदलैः पत्रसमूहैः संवेष्टितआवृतस्तथा राजन्ति दीप्यमानानि यानि चामराणि तैस्तथा सं सम्यक् प्रकर्षेण दृढेन बद्धा जटिता ये मु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुराआदर्शास्तैस्तथा उदूर्ध्वमञ्चन्ति स्फुरन्ति यानि विता-
नानि तैश्चान्वितोयुक्तः पुष्पफलैश्चापि युक्तोमहामण्डपो
भवतां फलायोत्तमफलप्राप्तये भूयादिति । यतउक्तं सिद्धा-
न्तशेखरे । आख्यातसाधनैः ल्कृप्तः सरलः सुसमानकः । मनो-
ज्ञोमण्डपोयोऽसौ कर्मकर्त्तुः शुभावह इति ॥ २९ ॥

भा. भा. ऊंचे पत्र वाले तथा फल भार से किञ्चित् झुके हुये कदली वृक्षां ने गोद में ले लिये हैं स्तम्भो को जिसमें तथा सर्वत्र आम्रादि वृक्षों के वन्दनवार लगे हैं जिसमें तथा प्रकाशमान चामर अयनक चंदवा वगैरह लगे हैं जिसमें तथा अनेक प्रकार के फल पुष्प शोभार्थ लगे हैं जिसमें ऐसा महामण्डप आपको शुभफल दायक होवै ॥ २९ ॥

इति श्री ज्यौतिषाचार्य पण्डितबलदेवपाठकविर-
चितायां भाषाभाष्यसमेतायां संस्कृतबलदा-
टीकायां कुण्डसिद्धौ प्रथमोऽध्यायः ॥१॥

अथ द्वितीयोऽध्यायः ।

तत्र नवकुण्डनिवेशनं विपरीताख्यानक्याह ।

मू॰ प्राच्याश्चतुष्कोणभगेन्दुखण्डत्रिकोणवृत्ताङ्गभुजाम्बुजा-
नि । अष्टास्रि शक्रेश्वरयोस्तु मध्ये वेदास्रि वा वृत्तमुश-
न्ति कुण्डम् ॥ १ ॥

अ. प्राच्याश्चतुष्कोणभगेन्दुखण्डत्रिकोणवृत्ताङ्गभुजाम्बुजानि-
अष्टास्रि चैतानि कुण्डानि उशन्त्याचार्याइति शेषः । तु
पुनः शक्रेश्वरयोर्मध्ये वेदास्रि वा वृत्तं कुण्डमुशन्त्याचार्या
इति शेषः ॥ १ ॥

सं. टी. प्राच्याः पूर्वदिशः सकाशात् चतुष्कोणं प्रसिद्धं भगं योनि-
कुण्डमिन्दुखण्डं वृत्तार्धं त्रिकोणं प्रसिद्धं वृत्तं वर्त्तुलकुण्ड
मङ्गभुजं षड्भुजमम्बुजं कमलमेतानि अष्टास्रयष्टकोणश्चै-
तानि कुण्डान्याचार्याउशन्ति । तु पुनः शक्र इन्द्रस्तस्य पूर्वा
दिगीश्वरो महादेवस्तस्येशानदिगनयोर्मध्येऽन्तराले वेदास्रि
चतुष्कोणं वा वृत्तं कुण्डमर्थद्वाचार्यकुण्डमाचार्याउशन्ती
च्छन्ति । तथोक्तं शारदातिलके । आचार्यकुण्डं मध्ये स्या-
द्गौरीपतिमहेन्द्रयोरिति । सिद्धान्तशेखरेऽपि । पुरन्दरे
शयोर्मध्ये वृत्तं वा चतुरस्रकं तदाचार्यविनिर्दिष्टमिति ॥१॥

भा. भा. यज्ञ के कुण्ड रचना में ३ पक्ष हैं प्रथम नव कुण्डीपक्ष जिसमें नवकुण्ड होते हैं द्वितीय पंचकुण्डी पक्ष जिस में पांच कुण्ड होते हैं तृतीय एक कुण्डी पक्ष जिस में एकही कुण्ड होता है ।
नव कुण्डी पक्ष में पूर्वादिक दिशा तथा विदिशाओं में क्रमसे चतुष्कोण योनि कुण्ड, अर्धचन्द्र, त्रिकोण, वृत्त, षड्भुज, कमल और अष्टकोण कुण्डो को बनाना यही तत्तद्दिशाओं के कुण्ड कहलाते हैं ।
ईशान और पूर्व कुण्डों के मध्य में नवम चतुष्कोण किम्वा वृत्तकुण्ड बनाना यही आचार्यकुण्ड कहलाता है ॥ १ ॥

पञ्चकुण्डैककुण्डयोर्निवेशनामिन्द्रवज्रयाह ।

मू॰ आशेशकुण्डैरिह पञ्चकुण्डी चैकं यदा पश्चिमसोमशैवे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेद्याःसपादेन करेण यद्वा पादान्तरेणाखिलकुण्डसंस्था २

अ. आशेशकुण्डैरिह पञ्चकुण्डी स्यात् । चात्पुनर्यदैकं तदा पश्चिमसोमशैवे कार्यम् । वेद्याः सपादेन करेण यद्वा पादान्तरेणाखिलकुण्डसंस्था स्यात् ॥ २ ॥

सं. टी. (आशा दिशः पूर्वदक्षिणपश्चिमोत्तरास्तथेशईशानकोणः तेषु यानि चतुरस्रार्धचन्द्रवृत्ताम्बुजाष्टास्रकाणि कुण्डानितै रिहात्र पञ्चकुण्डी स्यात् । तथोक्तं नारदीये । यत्रोपदिश्यते कुण्डं चतुष्कं तत्र कर्मणि । वेदास्रमर्धचन्द्रं च वृत्तं पद्मनिभं तथा । कुर्यात्कुण्डानि चत्वारि प्राच्यादिषु विचक्षणः । पंचमं कारयेत्कुण्डमीशदिग्गोचरं द्विजः । चात्पुनर्यदैकमेव कुण्डं चिकीर्षितं स्यात्तदा पश्चिमसोमशैवेऽर्थात्पश्चिमे चेद्वृत्तमुत्तरे पद्मनिभमीशाने चेदष्टास्रं कार्यम् । वेद्यामध्यवेद्याः सकाशात्सपादेन करेण सपादहस्तेनान्तरेण यद्वा पादान्तरेण मध्यवेद्या योविस्तारस्तस्य पादश्चतुर्थांशस्तदन्तरेणाखिलानां सर्वेषां कुण्डानां संस्था स्थितिः स्यात् । तथोक्तं वशिष्ठसंहितायाम् । वेदीपादान्तरं हित्वा नव कुण्डानि पञ्च चेति । नारदीये । कुण्डवेद्यन्तरं चैव सपादकरसम्मितमिति ॥२॥

भा. भा. पंच कुण्डी पक्ष में पूर्वादिक दिशा और ईशान कोण में तत्तद्दिशाओं के कुण्ड बनाना याने पूर्व में चतुरस्र दक्षिण में अर्धचन्द्र पश्चिम में वृत्त उत्तर में कमल और ईशान में अष्टकोण बनाना। यदि एकही कुण्ड बनाना हो तो पश्चिम उत्तर अथवा ईशान में तत्तद्दिशाओं के कुण्ड बनाना अर्थात् पश्चिम में वृत्त अथवा उत्तर में कमल यद्वा ईशान कोण में अष्टकोण । मध्य वेदी से सब कुण्ड सवा हाथ के फासिले पर अथवा मध्य वेदी की जो लम्बाई हो उसके चौथाई के फासिले पर बनाना ॥ २ ॥

एककुण्डीपक्षे विशेषमाह शालिन्या

मू० विप्राच्छ्रुत्यस्रं च वृत्तं च वृत्तार्धं त्र्यस्रि स्याद्वेदकोणानि वापि । सर्वाण्याहुर्वृत्तरूपाणि चान्ये योन्याकाराण्यङ्गनानान्तु तानि ॥ ३ ॥

अ० विप्रात् श्रुत्यस्रं च पुनः वृत्तं च पुनः वृत्तार्धं त्र्यस्रि स्यात् । अपि वा सर्वाणि वेदकोणान्याहुः । च पुनः अन्ये वृत्तरूपाण्याहुः । तु पुनः अङ्गनानां तानि योन्याकाराण्याहुः ॥ ३ ॥

सं. टी. विप्राद्ब्राह्मणादेरेककुण्डीपक्षे श्रुत्यस्रं चतुर्भुजं च पुनः वृत्तं वर्तुलं च पुनः वृत्तार्धमर्धचन्द्रं त्र्यस्रि त्रिकोणं स्यादपि वा पक्षान्तरे सर्वाणि ब्राह्मणाद्युक्तकुण्डानि चतुरस्राण्याहुरन्ये च वृत्तरूपाण्याहुः । तथोक्तं शारदायाम् । विप्राणां चतुरस्रं स्याद्राज्ञां वर्तुलमिष्यते । वैश्यानामर्धचन्द्राभं शूद्राणां त्र्यस्रमीरितम् चतुरस्रं तु सर्वेषां केचिदिच्छन्ति तान्त्रिकाः। पंचरत्ने । सर्वाणि तानि वृत्तानि चतुरस्राणि वा सदेति । तु पुनरङ्गनानां ब्राह्मणाद्यङ्गनानां यज्ञकर्तॄणां यागे तानि वर्णविभागोक्तानि कुण्डानि योन्याकाराण्यर्थाद्योनिकुण्डान्येवाहुः । तथाह सनत्कुमारः । स्त्रीणां कुण्डानि विप्रेन्द्र योन्याकाराणि कारयेदिति । अत्र दिशस्तु प्रागुक्ता एव योनिनिवेशनन्तु दिक्प्राधान्येनेति ॥ ३ ॥

भा. भा. एक कुण्डीपक्ष में यदि ब्राह्मण यज्ञ कर्ता हो तो चतुष्कोण क्षत्रिय हो तो वृत्त वैश्य को अर्धचन्द्र शूद्र को त्रिकोण अथवा सब के वास्ते चतुष्कोण बनाना अन्याचार्य सर्ववर्णों के वास्ते वृत्त कुण्ड कहते हैं और यदि किसी जाति की स्त्री यज्ञ-कर्त्री हो तो उसके वास्ते योनिकुण्ड बनवाना ॥ ३ ॥

कुण्डफलमाह ।

मू० सिद्धिः पुत्राः शुभं शत्रुनाशः शान्तिर्मृतिच्छिदे । वृष्टिरारोग्यमुक्तं हि फलं प्राच्यादिकुण्डके ॥ ४ ॥

अ० प्राच्यादिकुण्डके हि सिद्धिः पुत्राः शुभं शत्रुनाशः शान्तिर्मृतिच्छिदं वृष्टिरारोग्यं फलमुक्तम् ॥ ४ ॥

सं. टी. प्राच्यादिषु पूर्वाद्यष्टदिक्षु यत्कुण्डं तत्र पूर्वकुण्डे चतुरस्रे सिद्धिराग्निकोणे योनिकुण्डे पुत्राः पुत्रास्तयोर्दक्षिणेऽर्धचन्द्रे शुभं निऋतौ त्र्यस्रकुण्डे शत्रुनाशः पश्चिमे वर्तुले शा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्निर्वायौ षडस्रे मृतीच्छिदे मारणछेदनउत्तरे पद्मकुण्डे वृष्टिरीशानेऽष्टास्रिकुण्डेऽऽरोग्यमेतत्फलमुक्तमाचार्यैरिति एतेन स्वस्वाभीष्टकार्यसिद्धये यथोक्तकुण्डं रचयेदिति फलितार्थः। तथोक्तंशारदायाम्। सर्वसिद्धिकरं कुण्डं चतुरस्रमुदाहृतं। पुत्रप्रदं योनिकुण्डमर्धेन्द्राभं शुभप्रदम् शत्रुक्षयकरं त्र्यस्रं वर्त्तुलं शान्तिकर्मणि छेदमारणयोः षष्ठं षडस्रं पद्मसन्निभम्। वृष्टिदं रोगशमनं कुण्डमष्टास्रमीरितं४

भा. भा. किसी देवता के या कार्य के सिद्धि के लिये चतुरस्र पुत्रप्राप्ति के लिये योनि कल्याण के लिये अर्धचन्द्र शत्रुनाश के लिये त्रिकोण शान्तिकर्म में वृत्त मारण छेदन में षडस्र वृष्टि के वास्ते यज्ञ किया जाय तो पद्मकुण्ड तथा आरोग्य लाभ के लिये यज्ञ किया जाय तो अष्टास्र कुण्ड बनाना चाहिये यह कार्यपरत्व से कुण्ड निर्माण की विधि है ॥ ४ ॥

हवनसंख्यया कुण्डमानं शिखरिण्याह।

मू॰ शतार्धे रत्निः स्याच्छतपरिमितेऽरत्निविततं।
सहस्रे हस्तं स्यादयुतहवने हस्तयुगलम्।
चतुर्हस्तं लक्षे प्रयुतहवने षट्करमितं
ककुब्भिर्वा कोटौ नृपकरमपि प्राहुरपरे ॥ ५ ॥

अ॰ शतार्धे रत्निः शतपरिमितेऽरत्निविततं सहस्रे हस्तमयुत हवने हस्तयुगलं लक्षे चतुर्हस्तं प्रयुतहवने षट्करमितं स्यात्। कोटौ ककुब्भिः सममिति शेषः अपरे नृपकरमपि प्राहुः ॥ ५ ॥

सं. टी. शतार्धे पञ्चाशन्मितहवने रत्निरेकविंशत्यङ्गुलमितं। शतपरिमिते शतसंख्याकहवनेऽरत्निः सार्धद्वाविंशत्यङ्गुलस्तेन विततं विस्तृतं तत्तुल्यमिति यावत्। सहस्रे सहस्राहुतौ हस्तमेकहस्तामितं। अयुतहवने दशसहस्राहुतौ हस्तयुगलं द्विहस्तामितं। लक्षे लक्षाहुतौ चतुर्हस्तं चतुर्हस्तामितं। प्रयुतहवने दशलक्षाहुतौ षट्करामितं कुण्डं प्राहुः। कोटौ शतलक्षाहुतौ ककुब्भिरष्टभिर्हस्तैः सममपरे नृपकरं षोडशहस्तमपि कुण्डं प्राहुः। तथोक्तं भविष्ये। मुष्टिमानं शतार्धे तु शते चारत्निमात्रकं। सहस्रे त्वथ होतव्ये कुण्डं कुर्यात्करात्मकं। द्विहस्तमयुते तच्च लक्षहोमे चतुःकरम्। दशलक्षमिते होमे षट्करं सम्प्रचक्षते। अष्टहस्तात्मकं कुण्डं कोटिहोमेषु नाधिकमिति। ननूक्तसंख्यया न्यूनाधिके हवने किम्मानं कुण्डमित्याशङ्कापरिहारायोच्यते। भविष्योक्तवचनबलादित्थमवगम्यते यत्पञ्चाशता न्यूने न कुण्डं पंचाशदाहुतिमारभ्यैकोनशतं यावदाहुतौ॥ रत्निमितमेवं शतमारभ्यैकोनसहस्रं यावदरत्निमितमेवं सहस्रमारभ्यैकोनायुतं यावदेकहस्तमितमेवमयुतमारभ्यैकोनलक्षं यावद्धस्तद्वयमेवमग्रेऽप्ययमेव सिद्धान्त इति। यत्तु कैश्चिदन्तरं नवभिर्भक्तं यत्पूर्वापरकुण्डयोः। अङ्गुलानि यदाप्तं तु सा वृद्धिरिष्टहोमक इत्यनेन वृद्धिरुक्ता सा न समीचीना यतोऽष्टसहस्रहवने कर्त्तव्ये सहस्रहवनोक्तपूर्वकुण्डमानम् २४ अङ्गुलानि दशसहस्रापरकुण्डमानम् ३४ अङ्गुलानि अनयोरन्तरं १० नवभक्तं लब्धमङ्गुलं १ एतावदेवैकरूपा वृद्धिः सहस्रमारभ्यादशसहस्रपर्यन्तं स्यादिति महदसङ्गतमिति बुद्धिमद्भिर्विचिन्त्यमिति ॥ ५ ॥

भा. भा. ५० से न्यून हवन में कुण्ड नहीं है अधिक ९९ तक आहुति में २१ अंगुल का १०० से ९९९ तक आहुति में २२½ अंगुल का १००० से ९९९९ तक आहुति में १ हाथ का १०००० से ९९९९९ तक आहुति में २ हाथ का १००००० से ९९९९९९ तक हवन में ४ हाथ का १०००००० से ९९९९९९९ तक हवन में ६ हाथ का एक कोटि (करोड़) से अधिक हवन में ८ हाथ का कोई २ आचार्य १६ हाथ का भी कुण्ड कहते हैं ॥ ५ ॥

प्रकारान्तरेण कुण्डमानमुपजातिकयाह।

मू॰ लक्षैकवृध्यादशलक्षकान्तं करैकवृध्यादशहस्तकं च।
कोट्यर्धदिग्विंशतिलक्षलक्षदले मुनीष्वर्त्तुकृशानुभिश्च॥६॥

अ. लक्षैकवृध्यादशलक्षकान्तं करैकवृद्धादशहस्तकं च पुनः को-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यर्धदिग्विंशतिलक्षलक्षदले मुनीष्वर्त्तुकृशानुभिः चकाराद्ध-
स्तैः समं कुण्डं प्राहुरित्यध्याहारः ॥ ६ ॥

सं. टी. लक्षैकवृद्ध्या दशलक्षकानामन्तं मर्यादीकृत्यादशलक्षकान्त-मर्यादेकलक्षमारभ्य लक्षैकवृद्ध्या दशलक्षपर्यन्तमित्यर्थः।एव-मेव करैकमारभ्यैकैककरवृद्ध्यादशहस्तकं दशहस्तपर्यन्तं य-था लक्षाहुतावेकहस्तं लक्षद्वयाहुतौ द्विहस्तं लक्षत्रयाहुतौ त्रिहस्तमित्थमग्रेऽपि ज्ञेयम्। च पुनःकोटेरर्धे पञ्चाशल्लक्षे दिग्दशलक्षे विंशतिलक्षे लक्षदलेऽर्थात्पञ्चाशत्सहस्राहुतौ क्रमेण मुनयः सप्त ७ इषवः पञ्च ५ ऋतवः षड् ६ कृशा नवस्त्रयः ३ एतैश्चकाराद्धस्तैः समं कुण्डं प्राहुरिति पूर्वश्लोक तोऽध्याहारः । इयदेव परिमाणं कुण्डस्याप्तैर्ग्रन्थकर्तृभिः स्वीकृतम् । तथोक्तं शारदायाम् । एकहस्तमितं कुण्डं लक्ष-होमे विधीयते । लक्षाणां दशकं यावत्तावद्धस्तेन वर्धयेत् । सिद्धान्तशेखरे । लक्षार्धे त्रिकरं कुण्डं लक्षहोमे चतुष्करं । कुण्डं पञ्चकरं प्रोक्तं दशलक्षाहुतौ क्रमात् । षड्ढस्तं लक्ष-विंशत्यां कोट्यर्धे हस्तसप्तकमिति। अथात्र सूक्ष्मद्रव्यहवने लक्षैकवृद्ध्येति पक्षः स्थूलद्रव्यहवने शतार्धे रत्निरिति पक्षो ग्राह्यइत्यस्माकं मतमिति ॥ ६ ॥

भा. भा. एक लक्ष से लेकर दशलक्ष तक हवन में एक हाथ से लेकर दश हाथ तक कुण्ड बनाना कोई २ आचार्य ५० लक्ष हवन में ७ हाथ का २० लक्षण में ६ हाथ का और ५० हजार में ३ हाथ का कुण्ड कहे हैं । परन्तु यहां आचार्य का अभिप्रेत है कि स्थूल पदार्थ के हवन में ५ श्लोकोक्त और सूक्ष्मपदार्थ के हवन में ६ श्लोकोक्त कुण्ड बनाना यही मेरी भी सम्मति है ॥ ६ ॥

एक हस्तमारभ्यादशहस्तकुण्डानामङ्गुलात्मकं क्षेत्र-
मानं शार्दूलविक्रीडितवृत्तेनाह ।

मू० वेदाक्षीणि युगाग्नयः शशियुगान्यष्टाब्धयस्त्रीषवो
ऽष्टाक्षावन्हिरसारसाङ्कमितानेत्रर्षयोऽक्षस्वराः ।

अङ्गुल्योऽथ यवाः खमभ्रमिषवः खं पञ्च षट् सागराः ।
सप्ताभ्रं मुनयस्त्वमी निगदितावेदास्रके बाहवः ॥ ७ ॥

अ. वेदाक्षीणि युगाग्नयः शशियुगानि अष्टाब्धयः त्रीषवः अष्टाक्षाः वन्हिरसाः रसाङ्कमिताः नेत्रर्षयः अक्षस्वराः अङ्गुल्यः । अथ तु खं अभ्रं इषवः खं पञ्च षट् सागराः सप्त अभ्रं मुनयः यवाः । अमी वेदास्रके बाहवोनिगदिताः ७

स. टी. अङ्कानां वामतोगतिरितिन्यायात् वेदाश्चत्वारोऽक्षिणी द्वा-वेवं चतुर्विंशतिः २४ युगाश्चत्वारोऽग्नयस्त्रयएवं चतुस्त्रिंशत् ३४ शशिरेको युगानि चत्वार एवमेकचत्वारिंशत् ४१ अष्टौ प्रसिद्धाः अब्धयश्चत्वारएवमष्टचत्वारिंशत् ४८ अष्टौ प्रसिद्धा अक्षाः पञ्चैवमष्टपञ्चाशत् ५८ वन्हयस्त्रयोरसाः षडेवं त्रिषष्टिः ६३ रसाः षडङ्गानि च षडेवं षट्षष्टिः ६६ नेत्रं-द्वयं ऋषयः सप्तैवं द्विसप्ततिः ७२ अक्षाः पञ्च स्वराः सप्तैवं पञ्चसप्ततिः ७५ एताअङ्गुल्यः अथ तु खं शून्यं ० अभ्रं शून्यं ० इषवः पञ्च ५ षट् ६ सागराश्चत्वारः ४ सप्त ७ अभ्रं ० मुनयः सप्त ७ एते यवाश्चैकादिहस्तकुण्डेषु क्षेत्रपदव्याच्चशाबाहवोभुजानिगदिताः कथिताइत्यर्थः । ननु हस्तस्य चतुर्विंशत्यङ्गुलात्मकत्वात् द्व्यादिगुणितं चतुर्विं-शत्यङ्गुलं कथन्नाङ्गुलात्मकं द्व्यादिहस्तमानम्भवेदित्याशङ्का-म्परिहरन्नाह । एकहस्तजं फलं द्व्यादिगुणितं सत् द्व्यादि-हस्तजं फलं भवति यथैकहस्तकुण्डे फलं ५७६ वर्गाङ्गुलं तद्द्विगुणितं द्विहस्तजं ११५२ त्रिगुणितं त्रिहस्तजं १७२८ एवमग्रे ऽपि । एतेषाम्मूलानि क्रमेणैकादिहस्तमानमङ्गु-लात्मकं यथैकहस्तमानम् $\sqrt{५७६}=२४$ । द्विहस्तमानम् $=\sqrt{११५२}=३४$ । त्रिहस्तमानम् $=\sqrt{१७२८}=४१।५$ एवमग्रेऽपि । तथोक्तं वास्तवकुण्डसिद्धौ । तत्रैकहस्तजक्षेत्रफलं जि-नकुनेः समं । द्वित्र्यादिगुणितं तद्द्व्यादिहस्तोद्भवं सदा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

फलमेकभवं द्व्यादिगुणितं द्व्यादिहस्तजं। नहि द्व्यादिकराणां चाङ्गुलवर्गसमं हि तत् ॥ ७ ॥

भा. भा. आचार्य सब कुण्डो का मूल (प्रकृति) भूत चतुर्भुज को माना है परन्तु चतुर्भुज का मूलभूत वृत्त है इसलिये वृत्त को मूलभूत कहना अनुचित न होगा। एकादिहस्त चतुर्भुज के भुजों का मान अंगुल यव में पठित किये हैं जो नीचे दिये चक्र से मालूम होंगे यही प्रकृतिभूत वृत्त का व्यास तथा चतुर्भुज का भुज अथवा क्षेत्र कहा जाता है।

सन्देह होशक्ता है कि २४ अंगुल का एकहाथ होता है इसी को द्व्यादि अङ्कों से गुणन करने से द्व्यादि हस्तों का अङ्गुलात्मक मान होना चाहिये परन्तु ऐसा यहां क्यों नहीं होता।

इसका कारण वास्तव कुण्डसिद्धि के ५, ६ श्लोकों में स्पष्ट लिखा है कि एक हाथ के कुण्ड का फल $= २४^२ = ५७६$ होता है इसको द्व्यादि अंकों से गुणा करने से द्व्यादिहस्तकुण्डों का फल होता है अपने २ फलों का मूल अङ्गुलात्मक एकादि हस्तों का मान होता है जैसे एक हाथ का $\sqrt{५७६} = २४$। दो हाथ का $\sqrt{११५२} = ३४$। ३ हाथ का $\sqrt{१७२८} = ४१$। ५ इत्यादि ॥ ७ ॥

एकादि हस्तोंका अङ्गुलात्मक मान।

सं.	१	२	३	४	५	६	७	८	९	१०
फल	५७६	११५२	१७२८	२३०४	२८८०	३४५६	४०३२	४६०८	५१८४	५७६०
अंगुल	२४	३४	४१	४८	५३	५८	६३	६६	७२	७५
यव	०	०	५	०	५	६	४	७	०	७

कुण्डेषु योनिनिवेशनमिन्द्रवज्रयाह ।

मू० कुण्डत्रयी दक्षिणयोनिरैन्द्र्याः सौम्याग्रका स्यादितराणि पञ्च । पश्चाद्भगानीन्द्रदिगग्रकाणि योनिर्न कोणे न च योनिकुण्डे ॥ ८ ॥

अ० ऐन्द्र्याः सकाशात्कुण्डत्रयी दक्षिणयोनिः सौम्याग्रका स्यात्। इतराणि पञ्च पश्चाद्भगानि इन्द्रदिगग्रकाणि स्युः। कोणे योनिर्न कार्या योनिकुण्डे च योनिर्न कार्या ॥ ८ ॥

सं. टी. ऐन्द्र्याः पूर्वदिशः सकाशात्कुण्डानां त्रयी दक्षिणे योनिर्यस्याः सा किं विशिष्टा सा सौम्यउत्तरस्यां अग्रकाण्यग्राणि यस्याः सार्थात्पूर्वाग्नियाम्यकुण्डेषु दक्षिणदिश्युत्तराग्रा योनिर्विधेयैतानि कुण्डान्यप्युत्तराग्राणीति ज्ञेयम् । तथा चेतराणि निर्ऋतिपश्चिमवायूत्तरेशानगानि यानि पञ्च कुण्डानि पश्चात्पश्चिमायां भगानि भगाकृतयोयेषां तानि किंविशिष्टानीन्द्रादिश्यग्राण्यग्रकाणि येषां तान्यर्थादुक्तकुण्डेषु पश्चिमादिशि पूर्वाग्रा योनिर्विधेया तानि कुण्डान्यपि पूर्वाग्राणीति ज्ञेयम् । तथा च कोणे कुण्डस्य कोणे योनिर्न कार्येति । तथोक्तं स्वायम्भुवे । प्रागग्नियाम्यकुण्डानां प्रोक्ता योनिरुदङ्मुखी । पूर्वमुखाः स्थिताः शेषा यथाशोभं व्यवस्थितेति । त्रैलोक्यसारे । नवमस्यापि कुण्डस्य योनिर्दक्षदले स्थितेति । अन्यत्र । नार्पयेत्कुण्डकोणेषु योनितां तन्त्रवित्तम । योनिकुण्डे तथा योनिं पद्मे नाभिं विवर्जयेदिति ॥ ८ ॥

भा. भा. पूर्वाग्नि दक्षिण कुण्डों में दक्षिण दिशा में उत्तराग्र योनि रचना करना लेकिन अग्निकोण का कुण्ड स्वयं योनिकुण्ड है उसमें योनि निवेशन मना है तो पूर्वादिक तीन कुण्डों में योनिनिवेश विधान जो आचार्य कहे हैं वह गलत है ऐसा नहीं कहना क्योंकि इस श्लोक में आचार्य योनिनिवेश की तथा कुण्डों की दिशा भी बताया है इसलिये पूर्वादिक तीन कुण्ड उत्तराग्र हैं इसलिये पूर्वादिक तीन कुण्ड का ग्रहण आचार्य ने किया है। इसी तरह शेष कुण्ड पूर्वाग्र हैं इनके पश्चिम दिशा में पूर्वाग्र योनिरचना करना। कुण्ड के कोणों में तथा योनिकुण्ड में योनि रचना नहीं करना अर्थात् कुण्डों की रचना इस प्रकार करना जिसमें उक्त योनि के दिशामें कोण न पतित होवै ॥ ८ ॥

सर्वकुण्डप्रकृतिभूतं चतुरस्रं शालिन्याह ।

मू० द्विघ्नव्यासं तुर्यचिन्हं सपाशं सूत्रं शङ्कौ पश्चिमे पूर्वगेऽपि । दत्वा कर्षेत्कोणयोः पाशतुर्ये स्यादेवं वा वेदकोणं समानम् ॥ ९ ॥

अ० द्विघ्नव्यासं तुर्यचिन्हं सपाशं सूत्रं कृत्वेति शेषः । पश्चिमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्वगेऽपि शङ्कौ दत्वा पाशतुर्ये धृत्वेति शेषः कोणयोः कर्षेदेवं वा समानं वेदकोणं स्यात् ॥ ८ ॥

सं. टी. उद्दिष्टव्यासं द्विगुणितक्षेत्रसमं तुर्ये चतुर्थांशे चिन्हमङ्कं यस्मिन्तत् सपाशं पाशद्वययुक्तं सूत्रं डोरकं कृत्वेति शेषः । पश्चिमे पूर्वगेऽपिशङ्कौदृक्तपालौ यच्छङ्कुद्वयं तत्र दत्वा पाशाभ्यां तुर्ये चतुर्विंभागान्ते धृत्वेति शेषः । कोणयोरग्निनैर्ऋत्योरीशानवाय्वोर्वा कर्षेदेवं कृते समानं वेदकोणं चतुष्कोणं स्यात् । उक्तञ्च । चतुरस्रमिदं प्रोक्तं सर्वकुण्डेष्वयं विधिरिति । विदुषामुपकारायैकहस्तमारभ्यादशहस्तकुण्डनिर्माणाय चतुरस्रसारिण्यां व्यासादिकं लिखितमनया व्यासादिकमवगम्य कुण्डरचना सुखेन कार्येति ॥ ९ ॥

भा. भा. चतुरस्रकुण्ड सारिणी में एकादि हस्त के नीचे व्यासार्ध लिखा है जितने हाथ का कुण्ड बनाना हो उसके व्यासार्ध के तुल्य (मपू) सूत्र अथवा कर्काटक करके मछोर को स्थिर करके पूछोर को घुमाने से पूउपद वृत्त बनजायगा । उक्त रीति से किम्वा मण्डप के अनुमान से पूप पूर्वापर उद दक्षिणोत्तर रेखा कर देना ।



सारिणी में कोण साधन सूत्र का प्रमाण लिखा है उसके वरावर का एक सूत्र लेकर उसका ४ भाग करके बीच के दोनों भागों में चिन्ह करदेना अनन्तर दोनों छोरो पर दो पाश (सकर्मुद्धी) बनाकर पूप चिह्नों पर गड़े हुये दोनों कीलो में वांधकर उक्त दोनों चिन्हों को दोनों हाथं से पकड़ कर उत्तर के तरफ खीचने से जहां जमीन में दोनों चिह्न लगें वहां पूरव के तरफ ई ईशान कोण और पश्चिम के तरफ वा वायव्य कोण होता है इसी तरह दक्षिण के तरफ खींचने से पूरव के तरफ अ अग्निकोण और पश्चिम के तरफ नै नैरित्यकोण होता है ।

चारों कोणों में ४ शङ्कु गाड़कर सूत्र बांधने से चतुष्कोण कुण्ड बन जायगा जिसका चारो भुज क्षेत्र के समान होगा जैसे एक हाथ के कुण्डमें २४ अंगुल इसको वर्गक्षेत्र कहते हैं इस का फल भुज के वर्ग बरावर ५७६ वर्गाङ्गुल होगा (लीलावती क्षे. व्य. दे.) ॥ ९ ॥

चतुरस्रकुण्डसारिणी ।

हस्त		१	२	३	४	५	६	७	८	९	१०
क्षे. फ.	वर्गाङ्गु.	५७६	११५२	१७२८	२३०४	२८८०	३४५६	४०३२	४६०८	५१८४	५७६०
भुज	अं	२४	३४	४१	४८	५३	५८	६३	६६	७२	७५
	य	०	०	५	०	५	६	४	७	०	७
व्यासार्ध	अं	१२	१७	२०	२४	२६	२९	३१	३३	३६	३७
	य	०	०	६	०	६	३	६	३	०	७
सूत्र	हा	२	२	३	४	४	४	५	५	६	६
	अं	८	२०	१२	०	१२	२२	७	१४	०	८

योनिकुण्डमिन्द्रवज्रयाह ।

मू० क्षेत्रे जिनांशे पुरतः शरांशान्सम्वर्ध्य च स्वीयरदांशयुक्तान् । कर्णाग्निमानेन लिखेन्दुखण्डे प्रत्यक् पुरोऽङ्गाद्गुणतोभगाभम् ॥ १० ॥

अ० जिनांशे क्षेत्रे स्वीयरदांशयुक्तान् शरांशान् पुरतः सम्वर्ध्य च पुनः विद्वन् कर्णाग्निमानेन प्रत्यगिन्दुखण्डे लिख पुरोऽङ्गाद्गुणतो भगाभं स्यात् ॥ १० ॥

सं. टी. जिनाश्चतुर्विंशतिः विंशत्याद्याः सैकत्वद्मरः । अंशाभागायस्य तस्मिन चतुर्विंशतिधा विभक्तइत्यर्थः क्षेत्रे कर्त्तव्यकुण्डस्य क्षेत्रे शरांशान् जिनांशानां पञ्चभागान् किञ्चिद्विशिष्टान् स्वीयस्य पञ्चभागस्य ये रदांशास्तैर्युक्तान् पुरतोऽग्रतोयोनिकुण्डस्योत्तराग्रत्वादुत्तरबिन्दुत इत्यर्थः सम्वर्ध्य वर्धयित्वा च पुनः कर्णाग्निमानेन कर्ण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रेखायाश्चतुर्थांशमितेन सूत्रेण कर्कटकेन वा हे विद्वन् प्रत्यक् वर्धमानदिक्तः पश्चिमदिश्यर्थाद्विरुद्धदिशीन्दुखण्डे वृत्तार्द्धद्वयं लिख पुरोऽङ्कादर्धिताग्रचिन्हात्पूर्वापरसूत्रलग्नवृत्तार्धे यावद्गुणतः सूत्रदानाद्भगाभं भगाकृतिकुण्डं स्यात्। विदुषामुपकारायैकहस्तमारभ्यादशहस्तयोनिकुण्डनिर्माणाय वर्धनादिकमानीय योनिकुण्डसारिण्यां मया लिखितमनयेष्टयोनिकुण्डस्य वर्धनादिकं ज्ञात्वा तद्रचना कार्येति॥१०॥

भा. भा. प्रथम कर्त्तव्यकुण्ड के व्यासादि से उक्तवत् अनैवाई चतुष्कोण वनाकर योनिकुण्डसारिणी में जो वर्धन लिखा है उतनाही दक्षिणोत्तर रेखाको उत्तर की तरफ उं चिन्हतक बढ़ा देना। अनन्तर उं पु, उं प, पू द, पद रेखा करके पूद, पद के अर्ध चिन्ह से पू अ द, प नै द दो वृत्तार्ध बना देने से उं पू अ द नै प योनि कुण्ड होगा।



इस कुण्ड के मध्य में एक बड़ा त्रिभुज जिसका आधार पू प रेखा क्षेत्र के समान है वृहत् लंब उंम है तथा दूसरा त्रिभुज पूदप है इसका भी आधार वही परंतु लंब दम है जो लघु लंब कहलाता है और पू अ द, दनैप दो वृत्तार्ध मिलकर एक वृत्त एवं तीन क्षेत्र हैं इनके फलों का योग योनिकुण्ड का फल होगा। यह सिद्ध है कि त्रिभुज के आधार को लंब से गुणकर आधा करने से उसका फल होता है तथा वृत्त के व्यास के वर्ग को ३९२७ से गुण कर ५००० का भाग देने से वृत्त का फल होता है।

सारिणी से लंब वगैरह जानकर योनिकुण्ड का फल निकाल लेना चाहिये। जैसे एक हाथ के कुण्ड में वृहत् लंब १७।१।२ को आधार २४ से गुण कर आधा करने से वृहत्त्रिभुज का फल २०५।७।० हुआ लघु लंब १२ से आधार २४ को गुण कर आधा किया तो लघु त्रिभुज का फल १४४ हुआ वृत्त व्यास १६।७।६ के वर्ग २८७।७।४ को ३९२७ गुणन करने से ११३०७३०।४।४ हुआ इसमें ५००० से भाग दिया तो वृत्त फल २२६।१।१ हुआ तीनों फलों को जोड़ दिया तो कुण्ड का फल ५७६।०।१ हुआ इसी तरह अन्यत्र भी लेआना॥ १०॥

योनिकुण्डसारिणी।

हस्त		१	२	३	४	५	६	७	८	९	१०
फलं	वर्गांगुल	५७६	११५२	१७२८	२३०४	२८८०	३४५६	४०३२	४६०८	५१८४	५७६०
[illegible]	अं	२४	३४	४१	४८	५३	५८	६३	६६	७२	७५
	य	०	०	५	०	५	६	४	७	०	७
[illegible]	अं	८	१२	१४	१७	१८	२०	२२	२३	२५	२६
	य	३	०	५	०	७	६	३	५	३	६
	यू	७	१	५	०	५	१	४	१	५	४
[illegible]	अं	१६	२४	२९	३४	३७	४१	४४	४७	५०	५३
	य	७	०	३	०	७	४	७	२	७	५
	यू	६	२	३	०	३	२	१	२	२	१
[illegible]	अं	५	७	८	१०	११	१२	१३	१४	१५	१६
	य	१	२	७	२	४	५	४	२	३	२
	यू	२	५	४	४	१	१	७	६	६	२
[illegible]	अं	१७	२४	२९	३४	३८	४१	४५	४७	५१	५४
	य	१	२	६	२	२	७	२	६	३	१
	यू	२	५	०	४	५	४	७	२	६	६
[illegible]	अं	१२	१७	२०	२४	२६	२९	३१	३३	३६	३७
	य	०	०	६	०	६	३	६	३	०	७
	यू	०	०	४	०	४	०	०	४	०	४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वसन्तमालिकयार्धचन्द्रमाह ।

मू० स्वशतांशयुतेषुभागहीनस्वधरित्रीमितकर्कटेन मध्यात् ।
कृतवृत्तदलेऽग्रतश्च जीवां विदधात्विन्दुदलस्य साधुसिध्यै ११

अ. स्वशतांशयुतेषुभागहीनस्वधरित्रीमितकर्कटेन मध्यात्कृतवृत्तदले साध्विन्दुदलस्य सिध्यै अग्रतो जीवां विदधातु ११

सं.टी. स्वस्य शतांशेन शतभागेन युतोयइषुभागः चेत्रस्य पञ्चमांशस्तेन हीनोना या स्वधरित्री क्षेत्रमितिस्तान्मितकर्कटेन व्यासार्धेन मध्यात्केन्द्रविन्दुतः । किं केन्द्रमित्यतआह चतुरस्रस्य प्रकृतिभूतत्त्वात्तन्मध्यगतायादचिणोत्तररेखायाःमध्यविन्दुत उत्तरदिक्स्थमर्धार्धविन्दुरेव केन्द्रमतोदाक्षिणादिशि कृतवृत्तदले रचितवृत्तार्धे साधु यथार्थमिन्दुदलस्यार्धचन्द्रस्य सिद्ध्यै अग्रतोवर्धनदिशि जीवां व्यासतुल्यां पूर्णज्यां विदधातु करोतु विद्वानिति शेषः। विदुषामुपकारायैकहस्तमारभ्यादशहस्तार्धचन्द्रनिर्माणाय व्यासादिकमानीयार्धचन्द्रकुण्डसारिण्यां लिखितं मयानयेष्टकुण्डस्य व्यासादिकं ज्ञात्वा तद्रचना कार्येति ॥ ११ ॥

भा. भा. प्रथम कर्त्तव्य कुण्ड के व्यासादि से उक्तवत् अनैवाई चतुष्कोण बनाकर उस के दक्षिणोत्तर दउ रेखा के मध्यचिन्ह से उत्तर जो मउ अर्ध भाग है उसके आधे के आधे को केन्द्रमानकर वृत्तार्धसारिणी में जो व्यासार्ध लिखा है उसी प्रमाण के सूत्र अथवा कर्काटक से दक्षिण के तरफ वृत्तार्ध रूप चछज चाप बनाकर पूर्व पूर्वापर रेखा के समानान्तर चज जीवा कर देने से अर्धचन्द्र होता है।



सारिणी में व्यासप्रमाण लिखा है उससे उक्तवत् वृत्तफल निकाल कर उसका आधा करने से अर्धचंद्र का फल होगा। जैसे एक हाथ के अर्ध चन्द्र का व्यास ३८।२।३।३।६ है इस के वर्ग को ३९२७ से गुणकर ५००० से भाग देने से वृत्त का फल ११५२।२।६।४ भया इसका आधा ५७६।१।३।२ अर्धचंद्र का फल हुआ १ यव ३ यूका २ लीक्षा अधिक है इसका दोष नहीं है ॥११॥

अर्धचन्द्रकुण्डसारिणी

		१	२	३	४	५	६	७	८	९	१०
हस्त		१	२	३	४	५	६	७	८	९	१०
[illegible]	फलांगुल	५७६	११५२	१७२८	२३०४	२८८०	३४५६	४०३२	४६०८	५१८४	५७६०
[illegible]	अं	२४	३४	४१	४८	५३	५८	६३	६६	७२	७५
	य	०	०	५	०	५	६	४	७	०	७
[illegible]	अं	१९	२७	३३	३८	४२	४६	५०	५३	५७	६०
	य	१	१	१	२	६	७	५	२	३	४
	यू	१	०	५	३	२	०	३	७	५	३
	लीं	५	३	७	३	६	३	०	३	१	०
	धा	७	६	१	६	०	७	५	५	४	७
व्यासः	अं	३८	५४	६६	७६	८५	९३	१०१	१०६	११४	१२१
	य	२	२	३	४	४	६	२	५	७	०
	यू	३	०	३	६	५	०	६	६	२	६
	ली	३	७	६	७	४	७	१	७	३	१
	धा	६	४	२	४	०	६	२	२	०	६

त्रिभुजं शार्दूलविक्रीडितवृत्तार्धेनाह ।

मू० वन्ह्यंशं पुरतोनिधाय च पुनः श्रोण्योश्चतुर्थांशकम् ।
चिन्हेषु त्रिषु सूत्रदानतइदं स्यात्त्र्यस्रि कष्ठोज्झितम् ॥

अ. पुरतोवन्ह्यंशं निधाय पुनश्च श्रोण्योश्चतुर्थांशकं निधाय त्रिषु चिन्हेषु सूत्रदानतः इदं कष्ठोज्झितं त्र्यस्रि स्यात ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सं. टी. पुरतोऽग्रतः कस्येत्यतआह चतुरस्रस्य सर्वेषां कुण्डानां प्रकृतिभूतत्त्वात्त्रिकोणस्य पूर्वाभिमुखस्थितत्त्वाच्च चतुरस्रमध्यगतायाः पूर्वापररेखायाः पूर्वविन्दोरित्यर्थः वन्ह्यंशं क्षेत्रस्य तृतीयांशं निधाय संयोज्य वर्धयित्वेति यावत् । पुनश्च श्रोण्योः फलकयोः कटोना श्रोणिफलकमित्यमरः । पश्चिमविन्दुस्थदाक्षिणोत्तररेखाया उभयपार्श्वयोरित्यर्थः । चतुर्थांशकं क्षेत्रस्य चतुर्भागं निधाय त्रिषु चिन्हेषु त्रिष्वपि दानाग्रचिन्हेषु सूत्रदानतोरेखाकरणेनेदं कष्टोज्झितं सुखसाध्यमेतेन स्थूलमिदामिति सूचितं सूक्ष्मार्थं वास्तवकुण्ड सिद्धिर्विलोक्येति । त्र्यस्त्रि त्रिकोणं स्यादत्र विदुषामुपकारायैकहस्तमारभ्यादशहस्तत्रिकोणनिर्माणाय फलज्ञानाय च त्रिकोणसारिण्यां वर्धमानादिकमानीय मया लिखितमनयासर्वं ज्ञात्वा सुखेन कुण्डरचना कार्येति ॥

भा. भा. प्रथम कर्त्तव्य कुण्ड के व्यासादि से अनैवाई, चतुष्कोण बनाकर प पू पूर्वापर रेखा को पू के तरफ त्रिकोण सारिणी में जितनी अग्रवृद्धि लिखी है उतनी पूं तक बढ़ा देना अनन्तर वानै रेखा के दोनों तरफ सारिणी में जितनी श्रोणिवृद्धि लिखी है उतनी वां नैं चिन्हतक बढ़ाकर पूं वां, पूं नैं, रेखाकरने से पूं वां नैं त्रिभुजकुण्ड होगा । इस त्रिभुज में पूं प लंब तथा वां नैं आधार याने भूमि का मान सारिणी में लिखा है इससे उक्तवत् फल निकाल लेना । जैसे एक हाथ के कुण्ड में भूमि ३६ को लंब ३२ से गुणकर आधा करने से फल ५७६ होता है।



वर्त्तुलकुण्डं शार्दूलविक्रीड़ितवृत्तार्धेनाह ।

मू० विश्वांशैः स्वाजिनांशकेन सहितैः क्षेत्रे जिनांशे कृते ।
व्यासार्धेन मितेन मण्डलमिदं स्याद्वृत्तसंज्ञं शुभम् ॥१२॥

त्रिकोणसारिणी ।

हस्ताः		१	२	३	४	५	६	७	८	९	१०
क्षे.फ.	वर्गाङ्गुल	५७६	११५२	१७२८	२३०४	२८८०	३४५६	४०३२	४६०८	५१८४	५७६०
[illegible]	अं	२४	३४	४१	४८	५३	५८	६३	६६	७२	७५
	य	०	०	५	०	५	६	४	७	०	७
[illegible]	अं	८	११	१३	१६	१७	१९	२१	२२	२४	२५
	य	०	२	७	०	७	५	१	२	०	२
	यू	०	५	०	०	०	०	२	३	०	३
[illegible]	अं	६	८	१०	१२	१३	१४	१५	१६	१८	१९
	य	०	४	२	०	३	५	७	६	०	०
	य	०	०	०	०	२	४	०	०	०	०
[illegible]	अं	३२	४५	५४	६४	७१	७८	८४	८९	९६	१०१
	य	०	२	७	०	४	३	५	१	०	१
	यू	०	५	०	०	०	०	२	३	०	३
[illegible]	अं	३६	५१	६२	७२	८०	८८	९५	१००	१०८	११३
	य	०	०	१	०	३	१	२	३	०	७
	यू	०	०	०	०	४	०	०	०	०	०

भा० जिनांशे कृते क्षेत्रे स्वाजिनांशकेन सहितैर्विश्वांशैर्मितेन व्यासार्धेन मण्डलं रचयेदिति शेषः इदं शुभं वृत्तसंज्ञं स्यात् ॥ १२ ॥

सं. टी. जिनांशे कृते चतुर्विंशतिधा विभक्ते क्षेत्रे स्वस्य जिनांशकेन चतुर्विंशत्यंशकेन सहितैर्युक्तैर्विश्वांशैस्त्रयोदशभागैर्मि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तेन तत्तुल्येन व्यासार्धेन मण्डलं विरचयेदिति शेषः इदं शुभं शुभप्रदम्वृत्तसंज्ञं कुण्डं स्यात्। अत्रापि लाघवायैकहस्तमारभ्यादशहस्तवृत्तकुण्डानिर्माणाय वृत्तकुण्डसारिण्यां व्यासादिकमानीय मया लिखितमनयेष्टकुण्डस्य व्यासादिकं ज्ञात्वा तद्रचना सुखेन कर्त्तुं शक्येति ॥ १२ ॥

भा. भा. प्रथम कर्त्तव्यकुण्ड के व्यासादि से उक्तवत् अनैवाई चतुष्कोण बनाकर वृत्तकुण्ड सारिणी में जो व्यासार्ध लिखा है उसी प्रमाण के सूत्र अथवा



कर्काटक से चतुष्कोण के म मध्यचिन्ह से एक वृत्त बनाना पूप पूर्वापर तथा उद दक्षिणोत्तर रेखा को उभयतः परिधि याने वृत्त तक बढाने से जहां लगै वहां पू पूरव द दक्षिण प पश्चिम उ उत्तर दिशा मानना । सारिणी में व्यास लिखा है उस से उक्तवत् फलज्ञान करना जैसे एक हाथ के कुण्ड में व्यास २७ । ० । ५ । २ । ६ के वर्ग ७३३ । ४ । १ को ३६२७ से गुण कर ५००० से भाग देने से वृत्त फल ५७६।०।६। ५ होता है ॥ १२ ॥

स्रग्धरया षडस्रमाह ।

मू० भक्ते क्षेत्रे जिनांशैर्धृतिमितलवकैः स्वाक्षिशैलांशयुक्तै
र्व्यासार्धान्मण्डले तन्मितधृतगुणके कर्कटे चेन्दुदिक्तः ।
षट्सुचिन्हेषु प्रदद्याद्रसमितगुणकानेकमेकन्तु हित्वा
नाशे सन्ध्यर्त्तुदोषामपि च वृतिकृतेर्नेत्ररम्यं षडस्रम्॥१३॥

अ० जिनांशैर्भक्ते क्षेत्रे स्वाक्षिशैलांशयुक्तैर्धृतिमितलवकैर्व्यासार्धान्मण्डले कृतइति शेषः। तन्मितधृतगुणके कर्कटे चेन्दुदिक्तः षट्सुचिन्हेषु सम्पादितेष्विति शेषः। एकमेकं हित्वा रसमितगुणकान् प्रदद्यात् सन्ध्यर्त्तुदोषामपि च वृत्तिकृतेर्नाशे कृत इतिशेषः नेत्ररम्यं षडस्रं स्यादिति ॥ १३ ॥

वृत्तकुण्डसारिणी

	हस्त	१	२	३	४	५	६	७	८	९	१०
फलम्	वर्गाङ्गु०	५७६	११५२	१७२८	२३०४	२८८०	३४५६	४०३२	४६०८	५१८४	५७६०
भुं.	अं	२४	३४	४१	४८	५३	५८	६३	६६	७२	७५
	य	०	०	५	०	५	६	४	७	०	७
व्यासार्धम्	अं	१३	१९	२३	२७	३०	३३	३५	३७	४०	४२
	य	४	१	३	०	२	१	६	५	५	६
	यू	२	३	७	५	०	१	४	६	०	३
	ली	५	५	१	२	३	३	७	६	०	६
	वा	२	१	०	५	५	०	७	७	०	७
व्यासः	अं	२७	३८	४६	५४	६०	६६	७१	७५	८१	८५
	य	०	२	७	१	४	२	५	३	२	४
	यू	५	७	६	२	०	२	१	५	०	७
	ली	२	२	२	५	७	६	७	५	०	५
	वा	६	२	०	२	२	०	६	६	०	६

सं. टी. जिनांशैर्भक्ते चतुर्विंशतिधा विभक्ते क्षेत्रे स्वस्याक्षिशैलांशैर्द्विसप्तत्यंशैर्युक्तैः सहितैर्धृतिमितलवकैर्जिनांशानामष्टादशभागैर्व्यासार्धान्मण्डले वृत्ते कृत इति शेषः तन्मितधृतगुणके व्यासार्धतुल्यगृहीतडोरके कर्कटे च गृहीते इन्दुदिक्तउत्तरादिशः सकाशात् षट्सुचिन्हेषु सम्पादितेष्विति शेषः एतदुक्तंभवति कर्काटकस्यैकमग्रमुत्तरादिशि धृत्वा वृत्तोपरि भ्रामणेन तस्य समानाः षड्विभागाभवेयुस्तत्रोत्तरदिशएवैकमेकमेकैकं चिन्हं हित्वा त्यक्त्वा रसमितगुण-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDE

कान् षट्संख्याकपूर्णज्यासूत्रान् प्रदद्यात् अनन्तरं सन्धौ भवः सन्ध्यः दिगादिभ्यो यदिति यत्प्रत्यये कृते यचिभमित्यनेनभसंज्ञाकृते यस्येति चेत्यनेनेकारलोपे कृते सन्ध्य इति पदं सिद्धम् । तत्र ये ऋतवः षड्दोषोभुजास्तेषां अपिच वृत्तेर्वृत्तस्य कृतिरुपकरणं तस्यापि नाशे मार्जनेकृते नेत्ररम्यं नेत्राल्हादकरं षडस्रं षट्कोणं स्यात् । अत्र विदुषामुपकारायैकहस्तमारभ्यादशहस्तषडस्रकुण्डानिर्माणाय व्यासादिकमानीय प्रथमषडस्रकुण्डसारिण्यां लिखितमस्तीत्यनया व्यासादिकमवगम्य सुखेन कुण्डरचनाकार्येति॥१३॥

भा. भा. प्रथम कर्त्तव्यकुण्ड के व्यासादिसे उक्तवत अनैवाई चतुष्कोण वनाकर अनन्तर उसके म मध्यचिन्ह से प्रथम षडस्रकुण्ड सारिणी में जो व्यासार्ध लिखा है उसके तुल्य सूत्र अथवा कर्काटक से एक वृत्त वनाना अनन्तर उद दक्षिणोत्तर तथा पूप पूर्वापर रेखा को उभयतःवढ़ा देने से जहां परिधिमें लगै वहां पूं पूरव उं उत्तर पं पश्चिम दं दक्षिण दिशा मानना । उक्त कर्काटक के एक अग्र को उं उत्तर चिन्हपर रख कर परिधि को नापने से उं, क, च, दं, र, य ६ चिन्हों से परिधि का समान ६ भाग होजायंगे उं उत्तर चिन्ह से वीचके एक एक चिन्ह छोड़कर परस्पर में लगाकर १ उंच २ चर, ३ रउं ४ कदं ५ दंय, ६ यक भुजों को करके दो दो भुजों के योग (सन्धि) के वीच में भुजों के ६ खण्डों तथा वृत्त के उपकरण व्यासादि को मार्जन करने से सुन्दर षडस्र कुण्ड होगा ।

फलज्ञान के लिये इस में एक उंचर वृहत् त्रिभुज तथा प्रतिभुजों पर एक एक समान लघु त्रिभुज है इनके फलों के योग करने से षडस्र का फल होगा ।



सारिणी में दोनों त्रिभुजों की भूमि तथा लंब लिखा है उक्तवत फलज्ञान करना सुगम है । जैसे एक हाथ के प्रथम षडस्र कुण्ड के वृहत्भूमि ३१ । ४ । ७ । ० । ३ को वृहत् लंब २७ । ३ से गुणा किया तो ८६५ । २ । ३ । ५ हुआ इसका आधा वृहत् त्रिभुज का फल हुआ ४३२ । ५ । १ । ६ । एवं लघुलंब ६ । १ से लघुभूमि १० । ४ । २ । २ । ६ को गुणा किया तो ९६ । १ । १ । ३ । हुआ इसका आधा ४८ । ० । ४ । ५ एक लघु त्रिभुज का फल भया इसको ३ से गुणा किया तो १४४ । १ । ६ । ० तीन लघु त्रिभुज का फल भया इसको वृहत् त्रिभुज के फल में जोड़ दिया तो प्रथम षडस्र का फल ५७६ । ६ । ७ । ६ हुआ इसी तरह आगे भी जानना ॥१३ ॥

स्रग्धरयान्यत्षडस्रमाह ।

मू० अथवा जिनभक्तकुण्डमानात्तिथिभागैः स्वखभूपभागहीनैः । मितकर्कटोद्भवे तु वृत्ते विधुदिक्तः समषड्भुजैः षडस्रम् ॥ १४ ॥

अ० श्लोकस्वरूपएवास्यान्वयः ॥ १४ ॥

सं. टी. अथवा प्रकारान्तरेण जिनैश्चतुर्विंशत्या विभक्तं यत्कुंडमानं चेत्रप्रमाणं तस्मात् तिथिभागैः जिनांशानां पञ्चदशभागैः किम्विशिष्टैः स्वस्य खभूपभागैः षष्ठ्यधिकशततमांशैर्हीनैरहितैस्तन्मितकर्कटोद्भवे तत्तुल्यव्यासार्धोत्पन्ने वृत्ते तेनैवकर्काटकेनोत्तरविन्दुतः समषड्भागे कृते वृत्तइति शेषः तुपुनः विधुदिक्तः सौम्यादिशः सकाशात् समषड्भुजैः समानत्तुभुजैर्द्वितीयं षडस्रं स्यात् । अत्र विदुषामुपकारायैकहस्तमारभ्यादशहस्तकुण्डनिर्माणाय व्यासार्धादिकमानीय द्वितीयषडस्रकुण्डसारिण्यां मया लिखितमनयेष्टकुण्डस्य व्यासार्धादिकमवगम्य द्वितीयषडस्रकुण्डस्य रचना कार्येति ॥ १४ ॥

भा. भा. प्रथम कर्त्तव्य कुण्ड के व्यासादिसे उक्तवत् अनैवाई चतुष्कोण वनाकर द्वितीय षडस्रकुण्ड सारिणी में जो व्यासार्ध लिखा है उतने वड़े सूत्र अथवा कर्काटकसे म मध्यचिन्ह से एक वृत्त वनाकर तथा पूप पूर्वापर उद दक्षिणोत्तर रेखा को उभयतः परिधि तक वढ़ाने से जहां लगै वहां पूं पूरव दं दक्षिण पं पश्चिम उं उत्तर दिशा मानना अनंतर उं उत्तर चिन्ह से परिधि पर उक्तकर्काटक घुमाने से उं क, च, दं, र, य ६ चिन्हो से परिधि



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

प्रथमपडस्रकुण्डसारिणी ।

हस्त		१	२	३	४	५	६	७	८	९	१०
फलम्	वर्गाङ्गु.	५७६	११५२	१७२८	२३०४	२८८०	३४५६	४०३२	४६०८	५१८४	५७६०
भुजम्	अं	२४	३४	४१	४८	५३	५८	६३	६६	७२	७५
	य	०	०	५	०	५	६	४	७	०	७
व्यासार्धम्	अं	१८	२५	३१	३६	४०	४४	४८	५०	५४	५७
	य	२	६	५	४	६	५	२	६	६	५
	यू	०	६	१	०	१	२	२	६	०	४
लघुभूमिः	अं	१०	१४	१८	२१	२४	२५	२७	२९	३१	३३
	य	४	७	२	०	३	६	७	२	४	२
	यू	२	३	१	४	०	२	०	६	७	३
लघुलंबः	अं	९	१२	१५	१८	२०	२२	२४	२५	२७	२८
	य	१	७	६	२	३	२	१	३	३	६
	यू	०	३	४	०	०	५	१	३	०	६
बृहत् भूमिः	अं	३१	४४	५४	६३	७२	७७	८२	८८	९४	९९
	य	४	६	६	१	१	२	५	०	६	७
	यू	७	१	४	६	०	७	०	४	५	३
बृहत् लंबः	अं	२७	३८	४७	५४	६१	६७	७२	७६	८२	८६
	य	३	६	३	६	१	०	३	२	१	४
	यू	०	१	६	०	२	०	३	१	०	२

का समान ६ भाग होजांयगे एक चिन्हसे दूसरे चिन्हतक उंक, कच, चर्द, दॅर. रय यर्ड इन ६ रेखाओं को करके शेप रेखा तथा वृत्त को

मार्जन करने से द्वितीयपडस्रकुण्ड होता है।

इस पडस्र में रय उंदं तथा चकउंदं दो समान् समलंब चतुर्भुज हैं एक चतुर्भुज के फल को दूना करने से पडस्र का फल होगा सारिणी में कुमुख योगार्ध तथा लंब लिखा है इनके गुणा करने से एक चतुर्भुज का फल होता है।

जैसे एक हाथ के कुण्ड में कुमुखयोगार्ध २२। ७। २ को लंब १२। ७।२ से गुणा किया तो एक चतुर्भुज का फल २८८ हुआ इसको दूना किया तो पडस्र का फल ५७६ भया ऐसेही और भी जानाना ॥ १४ ॥

पद्मकुण्डं शार्दूलविक्रीड़ितवृत्तेनाह ।

मू० अष्टांशाच्च यतश्च वृत्तशरके यत्रादिमं कर्णिका युग्मे षोड़शकेशराणि चरमे स्वाष्टत्रिभागोनिते । भक्ते षोड़शधा शरान्तरधृते स्युः कर्कटेऽष्टौ छदाः सर्वास्तान्खन कर्णिकां त्यज निजायामौच्चकां स्यात्कजम् ॥ १५ ॥

अ० यतोऽष्टांशाद्वृत्तशरके निर्मित इति शेषः। यत्रादिमं कर्णिकायुग्मेषोड़शकेशराणि स्युरिति शेषः। स्वाष्टत्रिभागोनिते चरमे वृते षोड़शधा भक्ते शरान्तरधृते कर्कटेऽष्टौ छदाः स्युः तान् सर्वान्खन निजायामौचकां कर्णिकां त्यजैवं कजं स्यात् ॥१५॥

सं. टी. यतोयस्माच्चकाराचतुरस्रमध्यात् । अष्टांशात्क्षेत्रस्याष्टमांशात् चकरादेकादिभागवृद्ध्या वृत्तानां शरकं पञ्चकं तस्मिन् निर्मितइति शेषः। यत्र यस्मिन्वृत्तपञ्चके आदिमं प्रथमं वृत्तं कर्णिका कमलवीजकोशस्य कर्णिकेत्यभिधा युग्मे द्वितीयवृत्ते षोड़श केशराणि केशरस्थानानि अन्यानि पत्राणि स्युः। स्वस्याष्टभागस्याष्टत्रिभागेनाष्टात्रिंशदंशेनोनिते चरमेऽन्तिमे व्यासार्धे तदुत्पन्नवृत्तइत्यर्थः षोड़शधाभक्ते षोड़शविभागे कृते शराणां पञ्चानां चिन्हानामन्तरेऽवसाने धृते कर्कटे भ्रामणेनाष्टौ छदाः पत्राणि स्युरेतदुक्तं भवति अन्तिमवृत्तं समं षोड़शधाविभज्य अत्र दिग्विदिशोरन्तरालचिन्हे कर्कटकस्यैकमग्रं धृत्वान्यमान्तरस्य तस्मा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीयषडस्रकुण्डसारिणी ।

हस्त		१	२	३	४	५	६	७	८	९	१०
फलं	वर्गाङ्गुल	५७६	११५२	१७२८	२३०४	२८८०	३४५६	४०३२	४६०८	५१८४	५७६०
क्षेत्र	अं	२४	३४	४१	४८	५३	५८	६३	६६	७२	७५
	य	०	०	५	०	५	६	४	७	०	७
व्यासार्धं	अं	१४	२१	२५	२६	३३	३६	३६	४१	४४	४७
	य	७	०	६	६	२	३	३	३	५	०
	यू	२	७	६	४	३	७	४	३	६	७
[illegible]व्यासम्	अं	२२	३१	३८	४५	४९	५४	५९	६२	६७	७०
	य	२	५	६	१	७	५	१	१	०	५
	यू	७	३	१	६	५	६	२	१	५	३
संयमानं	अं	१२	१८	२२	२५	२८	३१	३४	३५	३८	४०
	य	७	२	३	६	६	४	१	७	५	६
	यू	२	३	१	४	६	६	२	०	५	३

त्पञ्चमोचिन्हे धरितस्य भ्रामणेनाष्टौ पत्राणि समुत्पद्यन्ते । तान्सर्वान् केशरादीन्वन निजः स्वीयोयआयामोव्यासस्तदुचासुत्सेधां कर्णिकां कर्णिकावृत्तं त्यज मा खनेत्यनेन गर्त्तप्रमाणं सूचितमेवं कजं पद्मकुण्डं स्याद् । अत्र कर्तृणामुपकारायैकहस्तमारभ्यादशहस्तकुण्डनिर्माणाय व्यासाधादिकमानीय मया पद्मकुण्डसारिण्यां लिखितमनयेष्टकुण्डरचनासुखेन सुज्ञैर्विधेयेति ॥ १८ ॥

भा. ना. प्रथम कर्त्तव्य कुण्ड के व्यासादि से उक्तवत् अनैवाई चतुष्कोण बनाकर चतुष्कोणके म मध्यचिन्ह से पद्मकुण्डसारिणीमें जो व्यासार्ध



लिखे हैं उनमें प्रथमव्यासार्ध से प्रथम वृत्त चतुर्थव्यासार्ध से चतुर्थवृत्त पंचमव्यासार्ध से पंचमवृत्त बनाकर चतुष्कोण के पूर्वापर दक्षिणोत्तर तथा कोणरेखाओं को अन्तिमवृत्त तक बढ़ाने से पू ई उ वा प न द अ चिन्हों से उसके ८ समान भाग हो जायंगे । इन भागों के भी क च न र य त ट व चिन्हो से आधा करने से १६ समान भाग होंगे ।

परकाल का एक शिरा क, च, न, र, य, त, ट, व, चिन्हों पर रख कर दूसरा शिरा उससे पांचवे चिन्ह पर रखकर घुमाने से जैसे यहां क चिन्ह पर रख कर उससे पांचवे न चिन्ह के दूरी से घुमाने से नभट चाप बनता है ऐसे ही सर्वत्र जानना ऐसा करने से पद्म कुण्ड होता है ।

प्रत्यक्ष देख पड़ता है कि चतुर्थ पंचम वृत्त के मध्य में जोवलयाकार क्षेत्र है उसके फल का आधा चतुर्थ वृत्त फल में जोड़ दें या पंचमवृत्त फल में घटा दे तो पद्म कुण्ड का फल होगा सारिणी में चतुर्थ तथा पंचम वृत्त का व्यास लिखा है इससे उक्त दोनों वृत्त का फल मालुम होगा इनका अन्तर करने से वलय का फल होगा ।

उक्तवत् पद्मकुण्ड का भी फल होगा ।

जैसे एक हाथ के पद्मकुण्ड में सारिणी में चतुर्थ व्यास २४ । ० । ० से उक्तवत् फल ४५२ । ३ । १ पंचम वृत्त का व्यास २९ । ६ । ६ से उक्तवत् फल ६९९ । ४ । ५ इनका अंतर वलय फल २४७ । १ । ४ इसका आधा १२३ । ४ । ६ चतुर्थ वृत्त फल में जोड़ दे या पंचम वृत्त फल में घटा दिया तो पद्म कुण्ड का फल ५७६ । १ । ७ भया ॥१५॥

विषमाष्टास्रकुण्डमुपजातिकयाह ।

मू० क्षेत्रे जिनांशे गजचन्द्रभागैः स्वाष्टाक्षिभागेन युतैस्तुवृत्ते ।
विदिग्दिशोरन्तरतोऽष्टसूत्रैस्तृतीययुक्तैरिदमष्टकोणम् १९

अ० जिनांशे क्षेत्रे गजचन्द्रभागैः किम्विशिष्टैः स्वाष्टाक्षिभागेन युतैस्तु वृत्ते विदिग्दिशोरन्तरतस्तृतीययुक्तैरष्टसूत्रैरिदमष्टकोणं स्यादिति ॥ १९ ॥

सं. टी. जिनांशे चतुर्विंशातिभागे कृते क्षेत्रे गजचन्द्रभागैर्जिनां-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पद्मकुण्डसारिणी ।

हस्त		१	२	३	४	५	६	७	८	९	१०
क्षेत्रम्	वर्गाङ्गुल	५७६	११५२	१७२८	२३०४	२८८०	३४५६	४०३२	४६०८	५१८४	५७६०
क्षेत्र	अं	२४	३४	४१	४८	५३	५८	६३	६६	७२	७५
	य	०	०	५	०	५	६	४	७	०	७
प्रथम व्यासार्ध	अं	३	४	५	६	६	७	७	८	९	९
	य	०	२	१	०	५	२	७	२	०	३
	यू	०	०	५	०	५	६	४	७	०	७
चतुर्थ व्यासार्ध	अं	१२	१७	२०	२४	२६	२९	३१	३३	३६	३७
	य	०	०	६	०	६	३	६	३	०	७
	यू	०	०	४	०	४	०	०	४	०	४
पंचम व्यासार्ध	अं	१४	२१	२५	२९	३३	३६	३९	४१	४४	४७
	य	७	१	७	६	२	४	३	४	६	१
	यू	३	१	०	६	६	२	७	५	१	४
चतुर्थ व्यास	अं	२४	३४	४१	४८	५३	५८	६३	६६	७२	७५
	य	०	०	५	०	५	६	४	७	०	७
	यू	०	०	०	०	०	०	०	०	०	०
पंचम व्यास	अं	२९	४२	५१	५९	६६	७३	७८	८३	८९	९४
	य	६	२	६	५	५	०	७	१	४	३
	यू	६	२	०	४	४	४	६	२	२	०

शानामष्टादशभागैः किञ्चिच्छिष्टैः स्वस्याष्टाशिभागेनाष्टवि-

शत्यंशेन युतैस्तुकाराव्यासार्धैः कृते वृत्ते । विदिशईशानाग्नि नैर्ऋत्यवायवो दिशः पूर्वदाक्षिणपश्चिमोत्तराः तयोरन्तरतो मध्यात् । सार्वविभक्तिकस्तम् । त्रयाणां संख्यानां पूरकस्तृतीयस्तेन युक्तैरेतद्वृत्तं भवति । विदिग्दिशोर्मध्येऽष्टचिन्होत्पादनेन वृत्तस्यान्येऽप्यष्टौ समाविभागाभवेयुस्तत्रैकचिन्हतः प्रातित्रिभागान्तगामिभिरष्टसूत्रैः पूर्णज्यारूपैरिदमष्टकोणं स्यात् अत्र कोणानां विषमत्वाद्विषमाष्टास्रकमित्यस्य संज्ञेति । विदुषामुपकारायैकहस्तमारभ्यादशहस्तकुण्डनिर्माणायोपकरणानि विषमाष्टास्रकुण्डसारिण्यां लिखितानि तान्यवगम्य सुखेन कुण्डरचना कार्येति ॥ १९ ॥

भा. भा. प्रथम कर्त्तव्य कुण्ड के व्यासादिसे उक्तवत् प्रकृति क्षेत्र याने चतुष्कोण बनाकर तदनन्तर विषमाष्ट कोण सारिणी में जो व्यासार्ध लिखा है उसके समान सूत्र या कर्काटक से चतुष्कोण के म मध्यचिह्न को केन्द्र मानकर



एक वृत्त बनाना अनन्तर कमल कुण्ड के ऐसा दिशा और विदिशा के मध्य में अ, इ, उ, क, ग, घ, च, ज चिह्न कर के इनमें किसी एक चिह्न से बीच में दो चिह्नों को छोड़, छोड कर चौथे चिह्न तक ८ रेखा करने से जैसे अ, चिह्न से १ अ क, २ क च, ३ च इ, ४ इ ग, ५ ग ज, ६ ज उ, ७ उ घ, ८ घ अ रेखाओं से अष्टकोण हुआ ॥

फलज्ञान के लिये थोड़ी देर तक बिन्दुरूप चघ, इउ, अज, क ग रेखायें करदेने से इउघच एक वृहत् आयत चतुष्कोण बन जायगा जिसमें इ च वृहत् कोटि तथा च घ वृहत् भुज है भुज कोटि का घात आयत चतुरस्र का फल होगा ।

वृहत् आयत के उभय पार्श्व में च ट घ, इ उ द दो त्रिभुज हैं यदि वृहदायत के फल में इन दोनों त्रिभुजों का फल घटा दिया जाय तो शेष कुण्डान्तगर्त क्षेत्र का शुद्ध फल होगा ।

सारिणी में लघु भुज लिखा है उस के वर्गार्ध के तुल्य एक त्रिभुज का फल होगा और वर्ग के तुल्य दोनों त्रिभुजों का फल होगा क्योंकि दोनों त्रिभुज समान है ।

उक्त आयत के दोनों पार्श्व में अ ज ट उ तथा क ग ध त दो समान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लघु आयत हैं और उन में भी कगय और अनज दो त्रिभुज उक्त त्रिभुज के समान हैं इनका फल स्वस्वायत फल में घटाने से लघु आयत का शुद्ध फल होगा इसलिये एक आयत के शुद्ध फल को दूना करने से दोनों आयत का शुद्ध फल होगा इसको वृहदायत के शुद्ध फल में जोड़ने से कुण्ड का स्पष्ट फल होगा।

लघुआयत की कोटि वृहद्भुज तथा भुज लघुभुज है जो सारिणी में लिखे हैं इन से उक्त आयत का फल निकाल लेना सहज है।

जैसे एक हाथ के कुण्ड में वृहत् कोटि ३४।४।१ को वृहत् भुज १४।२।१ से गुण दिया तो वृहत् आयत का फल ४६२।३।० भया इस में लघुभुज वर्ग के तुल्य द्विगुणित त्रिभुज का फल १०२।४।० घटाने से शुद्ध वृहत् आयत का फल ३८६।७।० हुआ वृहत्भुज १४।२।१। को लघुभुज १०।१।० से गुणा दिया तो लघुचतुर्भुज का फल १४४।३।४ भया इसमें लघु त्रिभुज का फल ५१।२।० घटा दिया तो शुद्ध लघु चतुर्भुज का फल ६३।१।४ भया इसको दूना किया तो द्विगुणित शुद्ध लघु चतुर्भुज का फल १८६।३।० भया इसको शुद्ध वृहत् आयत के फल में जोड़ दिया तो विषमाष्टकोण का शुद्ध फल ५७६।२।० भया इसी तरह सर्वत्र जानो ॥ १६ ॥

समाष्टास्रकुण्डमुपजातिकयाह

मू० मध्ये गुणे वेदयमैर्विभक्ते शक्रैर्निजर्ष्यंघ्रिलवेन युक्तैः वृत्ते कृते दिग्विदिशान्तराले गजैर्भुजैः स्यादथवाष्टकोणम् ॥ १७ ॥

अ० वेदयमैर्विभक्ते मध्ये गुणे निजर्ष्यंघ्रिलवेन युक्तैः शक्रैः कृते वृत्ते दिग्विदिशान्तराले गजैर्भुजैरथवाष्टकोणं स्यात् ॥ १७ ॥

सं. टी. वेदयमैश्चतुर्विंशतिभिर्विभक्ते मध्ये गुणे क्षेत्रे। निजैः स्वीयैः ऋष्यंघ्रिलवैः सप्तचत्वारिंशदंशकैर्युक्तैः सहितैः शक्रैर्जिनांशानां चतुर्दशभागैस्तत्तुल्यकर्कटकेन कृते सम्पादिते वृत्ते दिशः पूर्वदक्षिणापश्चिमोत्तराः विदिशईशानाग्निनैऋत्यवायवस्तयोरन्तराले मध्ये सम्पादिताष्टचिन्हमध्यइति शेषः गजैरष्टभिर्भुजैः सरलरेखाभिरथवान्यत्समाष्टास्रकुण्डं स्यात्। अत्रैकहस्तमारभ्यादशहस्तकुण्डनिर्माणायफलानयनाय च व्यासादिकमानीय समाष्टास्रकुण्डसा

ग्णियां मया लिखितमनयेष्टकुण्डस्य व्यासादिकं ज्ञात्वा सुखेन कुण्डरचना कार्येति ॥ १७ ॥

विषमाष्टास्रकुण्डसारिणी।

हस्त		१	२	३	४	५	६	७	८	९	१०
क्षे.फ.	वर्गांगुल	५७६	११५२	१७२८	२३०४	२८८०	३४५६	४०३२	४६०८	५१८४	५७६०
क्षेत्रं	अं	२४	३४	४१	४८	५३	५८	६३	६६	७२	७५
	य	०	०	५	०	५	६	४	७	०	७
व्यासार्धम्	ह	०	१	१	१	१	१	२	२	२	२
	अं	१८	३	८	१३	१७	२२	१	३	७	१०
	य	५	०	२	२	६	६	१	६	७	६
	यू	१	१	५	२	४	१	६	६	३	६
बृहत्कोटिः	अं	३४	४९	५९	६८	७७	८६	९०	९५	१०२	१०८
	य	४	७	५	६	१	२	६	६	२	५
	यू	१	३	३	६	६	६	०	१	३	२
बृहत् भु.	अं	१४	२०	२४	२८	३२	३५	३७	३९	४२	४५
	य	२	५	५	४	०	६	५	५	६	०
	यू	१	३	७	२	०	२	२	३	३	२
लघुभुज	अं	१०	१४	१७	२०	२२	२५	२६	२८	३०	३१
	य	१	५	३	१	४	२	४	०	२	६
	यू	०	०	६	१	७	२	७	३	०	४

भा. भा. पहले कर्त्तव्य कुण्ड के व्यासादि से उक्तवत् अनैवाई प्रकृति कुण्ड बनाकर उसके म मध्यचिन्ह से समाष्टास्र कुण्डसारिणी में जो व्यासार्ध लिखा है उस से वृत्त बनाकर वृत के दिशाविदिशाओं के मध्य में

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वत् अ इ उ क ग घ च ज आठ चिन्ह करके एक चिन्ह से दूसरे चिन्ह तक जैसे १ अ इ २ इ उ ३ उ क ४ क ग ५ ग घ ६ घ च ७ च ज ८ ज अ आठ भुजों को करने से समाष्टास्रकुण्ड होता है ।

फल ज्ञान के लिये वृत्त के मध्य चिन्ह से प्रति भुजों के सन्धि तक रेखा करने से ८ त्रिभुज होंगे एक त्रिभुज के फल को ८ गुणा करने से आठो का याने कुण्ड का फल होगा ।

सारिणी में लंव तथा भुज का प्रमाण लिखा है उनके गुणाकरने से २ त्रिभुज का फल होगा इसको ४ से गुणा करने से आठो त्रिभुज याने कुण्ड का फल होगा ।

जैसे एक हाथ के कुण्ड में लंव १३ । १ । ६ को भुज १० । ७ । ४ से गुणा किया तो दो त्रिभुज का फल १४४ । ४ । ५ भया इस को ४ से गुण दिया तो कुण्ड का फल ५७८ । २ । ४ होता है इसलिये यह कुण्ड अति स्थूल है ॥१७॥

समाष्टास्रकुण्डसारिणि

हस्त		१	२	३	४	५	६	७	८	९	१०
क्षेत्रम्	वर्गाङ्गुल	५७६	११५२	१७२८	२३०४	२८८०	३४५६	४०३२	४६०८	५१८४	५७६०
कोण	अं	२४	३४	४१	४८	५३	५८	६३	६६	७२	७५
	य	०	०	५	०	५	६	४	७	०	७
व्यासार्धं	अं	१४	२०	२४	२८	३१	३४	३७	३९	४२	४५
	यं	२	२	६	४	७	५	६	६	७	१
	यू	३	५	३	६	४	०	०	१	०	०
भुजः	अ	१०	१५	१८	२१	२४	२६	२८	३०	३२	३४
	य	७	४	७	७	३	४	७	३	६	४
	यू	४	३	६	१	४	०	१	३	४	२
लंबः	अं	१३	१८	२२	२६	२९	३१	३४	३६	३९	४१
	य	१	६	७	३	४	७	७	५	५	५
	य	१	२	०	३	०	७	[illegible]	[illegible]	[illegible]	[illegible]

अल्पहवने स्थण्डिलं वसन्ततिलकेनाह ।

मू० अथवापि मृदा सुवर्णाभासा करमानं चतुरङ्गुलोच्चमल्पे ।
हवने विदधीत वाङ्गुलोच्चं विबुधः स्थण्डिलमेव वेदकोणम् ॥ १७ ॥

अ० अथवापि विबुधोऽल्पे हवने सुवर्णभासा मृदा करमानं चतुरङ्गुलोच्चं वाङ्गुलोच्चं वेदकोणं स्थण्डिलमेव विदधीत १८

सं. टी. अथवाप्यल्पकालसाध्येऽल्पे हवने विबुधःसुवर्णभासा पीतवर्णया मृदा मृत्तिकया करमानमेकहस्तायामविस्तृतं चतुरङ्गुलोच्चं चतुरङ्गुलोच्छ्रितं वाङ्गुलोच्चमेकाङ्गुलोत्सेधं वेदकोणं चतुष्कोणं स्थण्डिलमुक्तलक्षणवेदिकायाःस्थण्डिलमिति संज्ञा विदधीत कुर्यात् । तथोक्तं तन्त्रसारे । मृदा सुवर्णया वापि सूक्ष्मवालुकयापि वा । अङ्गुलोच्चं तथा वेदाङ्गुलोच्चं स्थण्डिलं विदुः । चतुष्कोणमुदक्प्राचीप्लवमल्पाहुतौ शुभम् । पंचाङ्गुलोच्चमथवा वस्वङ्गुलसमुन्नतमिति ॥ १८ ॥



भा. भा. अथवा अल्पकालीन अल्प हवन में गौरमृत्तिका अथवा बालू का एक हाथ लंबा चौड़ा ४ अंगुल वा एक अङ्गुल ऊंचा स्थण्डिल बनाना स्थण्डिमें भी मेखला किसी २ के मत से होती है ।

इति श्रीज्योतिषाचार्य पण्डित बलदेव पाठककृतायां बलदाटीकायां भाषाभाष्यसमेतायां द्वितीयाध्यायः समाप्तः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तृतीयोऽध्यायः

खातकण्ठयोर्मानमनुष्टुभाह ।

मू० खातं क्षेत्रसमं प्राहुरन्ये तु मेखलां विना ।
कण्ठोजिनांशमानः स्यादर्कांशइति चापरे ॥ १ ॥

अ० आचार्य्याः क्षेत्रसमं खातं प्राहुः । तु पुनरन्ये मेखलां विना प्राहुः । जिनांशमानः कण्ठः स्यात् । च पुनरपरेऽर्कांशः स्यादिति जगुः ॥ १ ॥

सं.टी. आचार्याः क्षेत्रसमं क्षेत्रतुल्यं खातं गर्त्तं प्राहुः परमिदं मेखलया सहितमर्थान्मेखलोच्छ्रायोनस्वस्वक्षेत्रसमां भूमिं निखनेदित्यर्थः । तथोक्तं सिद्धान्तशेखरे । खातं कुण्डप्रमाणं स्यादूर्ध्वमेखलया सहेति । मोहशूलोत्तरेऽपि । हस्तमानं खनेत्तीर्यगूर्ध्वमेखलया सहेति । अन्ये तु मेखलाम्विनैवार्थाद्भूमावेव क्षेत्रसमं खननमाहुः शारदातिलके । यावत्कुण्डस्य विस्तारः खननं तावदीरितमिति । प्रयोगसारे च । चतुरस्रं चतुःकोणं सूत्रैः कृत्वा यथा पुनः । हस्तमात्रेण तन्मध्ये तावन्निम्नायतं खनेत् । चतुर्विंशाङ्गुलायामं तावत्खातसमन्वितमिति । ननु मतद्वैधे कतमस्य प्रामाण्यमित्यत आह । स्मृतिद्वैधे तु विषयः कल्पनीयः पृथक् पृथगिति वचनाद्धवनीयपदार्थस्याण्वनणुभेदेन पूर्वोत्तरपक्षावाश्रयणीयौ । यतोऽनौचित्यादर्थपरिमाणमिति कात्यायनोक्तिः । अथच जिनांशमानः क्षेत्रस्य चतुर्विंशत्यंशः पारिभाषिकाङ्गुलः कुण्डस्य परितः कण्ठः स्यात् । तथोक्तं कालोत्तरे । खाताद्बाह्येऽङ्गुलः कण्ठः सर्वकुण्डेष्वयम्विधिः । चतुर्विंशतिमो भागः कुण्डानामङ्गुलः स्मृतः । च पुनरपरे आचार्य्याः अर्कांशः क्षेत्रस्य द्वादशांशः कण्ठः स्यादिति जगुः । तथोक्तं सोमशम्भौ । बहिरेकाङ्गुलः कण्ठो ग्रवङ्गुलस्तु भवेत्क्वचिदिति । विद्वुषामुपकारायैकादिहस्तकुण्डेषु-

खननादिकमानीय खननसारिण्यां लिखितमनयेष्टकुण्डस्य खननादिकं ज्ञात्वा कुण्डरचना कार्येति ॥ १ ॥

भा. भा. खात कहते हैं कुण्ड के गहराई को वह मेखला के उचाई से क्षेत्र के समान होना चाहिये अर्थात् क्षेत्र में मेखला की उचाई घटाने से जो बचे उतनीही गहरी जमीन कुण्ड के मध्य में खनना चाहिये । जैसे एक हाथ के कुण्ड त्रिमेखला पक्ष में क्षेत्रप्रमाण २४ और मेखला की उचाई ९ अंगुल है इसलिये १५ अंगुल गहरी जमीन खोदना चाहिये ।
अन्य आचार्य मेखला को छोड़कर केवल जमीन ही को क्षेत्र के बराबर खनने को कहते हैं जैसे एक हाथ के कुण्ड में २४ अङ्गुल गहरा खोदना चाहिये ।

सूक्ष्म पदार्थ के हवन में पूर्व पक्ष और स्थूल पदार्थ के हवन में परपक्ष लेना ।

क्षेत्र का चौवीसवां भाग एक पारिभाषिक अङ्गुल होता है इसीके बराबर कुण्ड के चारो तरफ जमीन छोड़कर मेखला बनाना चाहिये कोई २ आचार्य बारहवां भाग भी छोड़ने को कहा है इस छूटे हुये भाग को कण्ठ कहते हैं ॥ १ ॥

मेखलानामधमतादिपक्षमाह ।

मू० अधमा मेखलैका स्यान्मध्यमं मेखलाद्वयम् ।
श्रेष्ठास्तिस्रोऽथवा द्वित्रिपंचस्वधमतादिकम् ॥ २ ॥

अ० एका मेखला अधमा स्यात् मेखलाद्वयं मध्यमं स्यात् तिस्रो मेखलाः श्रेष्ठाः स्युरथवा द्वित्रिपंचसु अधमतादिकं वाच्यम् ॥ २ ॥

सं.टी. एका मेखला वक्ष्यमाणरूपा अधमा स्यात् । मेखलाद्वयं मध्यमं स्यात् । तिस्रो मेखला श्रेष्ठाः स्युरिति । तथोक्तं क्रियासारे । नाभियोनिसमायुक्तं कुण्डं श्रेष्ठं त्रिमेखलं कुण्डं द्विमेखलं मध्यं नीचं स्यादेकमेखलम् । अथवा पक्षान्तरे द्वित्रिपंचसु द्विमेखले त्रिमेखले पंचमेखले च कुण्डे क्रमादधमतादिकमर्थादधममध्यमोत्तमताः स्युः । तथोक्तं लक्षणसंग्रहे । मुख्यास्तु पंच ताः प्रोक्ता मध्यमास्तिस्र एव च । द्वे स्यातामधमे पक्षे एका सा त्वधमाधमा । सोमशं-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

खननमेखलासारिणी

हस्त		१	२	३	४	५	६	७	८	९	१०
क्षेत्रम्	अं	२४	३४	४१	४८	५३	५८	६३	६७	७२	७५
	य	०	०	५	०	५	६	४	७	०	७
क्षेत्राष्टमांश	अं	३	४	५	६	६	७	८	८	९	९
	य	०	२	२	०	६	३	०	४	०	४
खननं	अं	१५	२१	२६	३०	३३	३६	४०	४२	४५	४७
	य	०	३	२	०	६	७	०	४	०	४
मेखलोच्छ्रिति	अं	९	१२	१५	१८	२०	२२	२४	२५	२७	२८
	य	०	६	६	०	२	१	०	४	०	४
१ मे. उ.	अं	४	५	७	८	९	९	१०	११	१२	१२
	य	०	५	०	०	०	६	५	३	०	५
२ मे. उ	अं	३	४	५	६	६	७	८	८	९	९
	य	०	२	२	०	६	३	०	४	०	४
३ मे. उ	अं	२	२	३	४	४	५	५	५	६	६
	य	०	७	४	०	४	०	३	५	०	३

भुना तु विशेष उक्तः । त्रिमेखलं द्विजे कुण्डे क्षत्रियस्य द्विमेखलं मेखलैका तु वैश्यस्येति। अत्र द्विजादिकर्तृके याग इति बोध्यं न तु जातिपरत्वेनोक्तकुण्डइति ॥ २ ॥

भा. भा. एक मेखला वाला कुण्ड अधम दो मेखला वाला मध्यम तीन मेखला वाला उत्तम होता है। अथवा दो मेखला वाला अधम तीन मेखला वाला मध्यम पांच मेखला वाला उत्तम है यह भी किसीरका मत है॥२॥

खातमानं मेखलामानं च रथोद्धतयाह ।

मू० अष्टधा विहितकुण्डशरांशैः संखनेद्भुवमुपर्यनलांशैः ।
मेखला विरचयेदपि तिस्रः षड्गजार्कलववित्स्तृतिपिण्डाः ३

अ० अष्टधा विहितकुण्डशरांशैः भुवं संखनेत् । अनलांशैरुपरि तिस्रोऽपि मेखला रचयेत्। किम्विशिष्टा मेखलाः षड्गजार्कलववित्स्तृतिपिण्डाः ॥ ३ ॥

सं. टी. अष्टधा विहितस्याष्टधा विभाजितस्य कुण्डस्य क्षेत्रस्य ये शरांशाः पंचविभागास्तैरर्थात्तत्तुल्याङ्गुलैर्भुवं कुण्डभूमिं संखनेत् । यथैकहस्तकुण्डस्याष्टमांशः ३ अस्य पंचभागाः १५ तेन पंचदशाङ्गुलं भुवं संखनेदित्यर्थः । अनलांशाः अष्टमांशस्य त्रयोभागास्तैर्यथैकहस्तकुण्डे नवाङ्गुलैरुपरि भूमेरुपरि तिस्रोऽपि मेखला विरचयेदेवं व्यादिहस्तकुण्डेऽपि ज्ञेयमेतेन मेखलया सहितं खातमाचार्यस्याभिप्रेतमिति सूचितं भवति । तथोक्तं विश्वकर्मणा । व्यासात्खातः करः प्रोक्तोनिम्नं तिर्यग्ङ्गुलेन तु । कण्ठात्परं मेखला तु उन्नता सा नवाङ्गुलैरिति । क्रियासारेऽपि । प्रधानमेखलोत्सेधमुक्तमत्र नवाङ्गुलम् । तद्वात्मेखलोत्सेधमङ्गुलद्वितयं क्रमात्। एतदेकहस्तकुण्डविषयम् । किम्विशिष्टामेखलाः षड्गजार्कलववित्स्तृतिपिण्डाः क्षेत्रस्य षड्लवैः षष्ठांशैर्गजलवैरष्टमांशैरर्कलवैर्द्वादशांशैस्तुल्यौ विस्तृतिपिण्डौ विस्तारोच्छ्रिती यासां तास्तथैतदुक्तं भवति यथैकहस्तकुण्डे क्षेत्रस्य षडंशश्चतुरङ्गुलमष्टमांशस्त्र्यङ्गुलं द्वादशांशोद्व्यङ्गुलं तेन प्रथमा मेखला चतुरङ्गुलविस्तारोच्छ्रायवती द्वितीया त्र्यङ्गुलविस्तारोच्छ्रायवती तृतीया द्व्यङ्गुलविस्तारोच्छ्रायवती त्येवमन्यत्रापि ज्ञेयम् । तथोक्तं योगिनीहृदये । मेखलाः शृणु मे देवि हस्तादिषु विशेषतः । षण्नागार्कांशसंभागैर्मिताः स्युर्गोपिताः शुभाः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भा. भा. एकादि हस्त कुण्डों के क्षेत्र का आठ भाग करके पांच भाग के बरोबर भूमि खनना और तीन भाग के बरोबर ऊंचा मेखला बनाना। क्षेत्र के षष्ठांशके तुल्य चौड़ा तथा ऊंचा प्रथम मेखला और अष्टमांश के बरोबर चौड़ा तथा ऊंचा दूसरा मेखला एवं बारहवें भाग के बरोबर चौड़ा तथा ऊंचा तीसरा मेखला बनाना कुण्ड के समीप वाला मेखला प्रथम तथा दूर वाला तृतीय एवं बीच वाला द्वितीय जानना ॥ ३ ॥

प्रकारान्तरेणमेखलामानं नाभिमानं च विपरीताख्यानकीभ्यामाह

मू० रसांशकादुन्नतविस्तृताश्च तिस्रोऽथवैका युगभागतुल्या।
पंचाथवा षट्शरवेदरामद्व्यंशैस्तताः स्युर्नवभागपिण्डा ४
आद्या परास्तच्छरभागहीनाजिनांशकण्ठाद्बहिरेव सर्वाः
कुण्डानुकारा अपि मेखलाः स्युरर्काङ्गभागोच्चततस्तु-
नाभिः ॥ ५ ॥

अ० च पुनः रसांशकादुन्नतविस्तृताः तिस्रो मेखलाः स्युः। अथवैका युगभागतुल्या कार्या। अथवा षट्शरवेदरामद्व्यं-शैस्तताः पंच मेखलाः स्युस्तत्राद्या नवभागपिण्डा अपराः तच्छरभागहीनाः स्युः। अपिच सर्वा मेखलाः जिनांशकंठा-द्बहिः कुण्डानुकाराएव स्युः। तु पुनरर्काङ्गभागोच्चततः नाभिः स्यात् ॥ ४ ॥ ५ ॥

स. टी. च पुनः रसांशकादुन्नतविस्तृताः क्षेत्रस्य षडंशादुन्नता उच्छ्रिताः षडंशेनैव विस्तृताः तिस्रोमेखलाः स्युरेतदुक्तम्भवति यथैकहस्तकुण्डे क्षेत्रस्य षडंशः ४ तेनाधः क्रमात् प्रथमा मेखला द्वादशाङ्गुलविस्तृता चतुरङ्गुलोच्चा द्वितीया-ष्टाङ्गुलविस्तृता चतुरङ्गुलोच्छ्रिता तृतीया चतुरङ्गुलविस्तृता तावदेवोच्चत्येवमन्यत्रापि ज्ञेयम्। तथोक्तं वाशिष्ठयाम्। प्रथमा मेखला तत्र द्वादशाङ्गुलविस्तृता चतुर्भिरङ्गुलैस्तस्या-श्चोन्नतिश्च समन्ततः। तस्याश्चोपरि वप्रः स्याच्चतुरङ्गुलमुन्नतः। अष्टाभिरङ्गुलैः सम्यग्विस्तीर्णन्तु समन्ततः तस्योपरि पुनः कार्योवप्रः सोऽपि तृतीयकः। चतुरङ्गुल

विस्तीर्णश्चोन्नतश्च तथाविध इति। इयमेव द्वादशाङ्गुलपक्षीया मेखला कथमित्यग्रे विस्तरतः कथयिष्ये। अथवैका मेखला युगभागेन क्षेत्रस्य चतुर्थांशेन तुल्योन्नता विस्तृता च कार्या यथैकहस्तकुण्डे क्षेत्रस्यास्य २४ चतुर्थांशः ६ तेन षडङ्गुलोन्नता विस्तृता चैवमन्यत्रापि। तथोक्तं पिङ्गला-मते। एका षडङ्गुलोत्सेधा विस्तारा मेखला मतेति। अथ-वा पंचमेखलापक्षे तावच्चतुर्विंशतिधा भक्ते क्षेत्रे लब्धा-ङ्गुलादिसममेकं पारिभाषिकाङ्गुलं भवेत्। तत्र षट् प्रसि-द्धाः शराः पंच वेदाश्चत्वारोरामास्त्रयोद्वौ प्रसिद्धौ एतदं-शैरर्थात्पारिभाषिकाङ्गुलैर्विस्तृताः प्रथमाद्याः पंच मेखलाः स्युस्तत्राद्या प्रथमा मेखला नवभागपिण्डा पारिभाषिक न वाङ्गुलोच्चा स्यादपराश्चतस्रः तस्याः प्रथममेखलोच्छ्रिते र्यः शरभागः पंचमांशस्तेन हीनाः स्युरर्थाच्छरभागहीना प्रथमोच्छ्रितिर्द्वितीयोच्छ्रितिः पुनस्तेन हीना द्वितीयोच्छ्रि-तिस्तृतीयोच्छ्रितिः स्यादेयमग्रेऽपि। सिद्धान्तशेखरे। ष-ड्वाणाब्धिवन्हिनेत्रमिताः स्युः पंच मेखलाः। लक्षणसंग्रहे। पंच वा मेखलाः कार्याः षट्पंचाब्धित्रिपक्षकैः। प्रथमा कुण्डसहितान्तरोत्सेधनवाङ्गुलेति। अपिच किन्तु सर्वामे-खलाजिनांशकण्ठात्पारिभाषिकाङ्गुलसमकण्ठाद्बहिःकुण्डा-नुकाराः कुण्डसदृशा एव स्युः। पिङ्गलामते। खातादिकाङ्गुलं त्यक्त्वा मेखलानां स्थितिर्भवेत्। शारदायाम्। कुण्डानां यादृशरूपं मेखलानां च तादृशमिति। तु पुनरर्काङ्गभा-गाभ्यां क्षेत्रस्य द्वादशांशषडंशाभ्यां समावुच्चततावुच्छ्रि-तिविस्तारौ यस्य तथाभूतः कुण्डस्य मध्ये नाभिः कार्यः॥४॥५॥

भा. भा. किसी २ का मत है कि क्षेत्र के षष्ठांश के बराबर ऊंची तथा चौड़ी ३ मेखला बनाना जैसे एक हाथ के कुण्ड में क्षेत्र २४ का षष्ठांश ४ अंगुल के समान हर एक मेखलाओं की उच्छ्रिति तथा विस्तार होगा इसलिये ऊर्ध्व क्रमसे प्रथम मेखला की उच्छ्रिति १२ अंगुल द्वितीय की ८ अंगुल तृतीय की ४ अंगुल हुई यही (अर्काङ्गुल) द्वादशाङ्गुल पक्षीय मेखलामान है यदि यह कहो कि ४ हाथ के कुण्ड में क्षेत्र ४८ का षष्ठांश ८ अंगुल है

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इसलिये प्रथम मेखला की उच्छ्रिति २४ अंगुल हुई तो यह द्वादशाङ्गुल पक्ष नहीं सिद्ध हुआ तो इसका विचार अथार्काङ्गुलपक्षे तु इस श्लोकमें किया गया है देख लेना चाहिये।

यदि एक ही मेखला बनाना हो तो क्षेत्र के चतुर्थांश के बराबर ऊंची तथा चौड़ी बनाना।

पंच मेखलापक्ष में

क्षेत्र में २४ का भाग देने से जो लब्ध अंगुल यव यूका इत्यादि होता है उसको पारिभाषिक एक अंगुल कहते हैं इस अङ्गुल के मान से ६, ५, ४, ३, २ अंगुल चौड़ी पाचों मेखला बनाना प्रथम मेखला की ऊचांई ६ अंगुल होती है प्रथम के ऊचाई का पंचमांश प्रथम के ऊचाई में घटा देवें तो दूसरी की ऊचांई एवं उसी पंचमांश को दूसरी ऊंचाई में घटा दे तो तीसरी की ऊचाई इसी तरह आगे भी जानना पंचमेखला सारिणी म सबकी ऊचाई और विस्तार व्यावहारिक अंगुल से लिखा है उससे मेखला बनाना सुगम है।

नाभिलक्षणं शालिन्याह

मू. कुण्डाकारोनाभिरम्भोजसाम्योवाब्जेऽयं नेनांशहानि-र्दलाग्रे। शेषक्षेत्रे वन्हिवृत्तैः समेते स्युर्वै कर्णी केसराः पत्रकाणि ॥ ६ ॥

अ० कुण्डाकारोवाब्जसाम्योनाभिः स्यात्। अब्जेऽयं न स्यात्। दलाग्रे इनांशहानिः कार्यः। वन्हिवृत्तैः समेते शेषक्षेत्रे वै नि-श्चयेन कर्णी केसराः पत्रकाणि स्युः ॥ ६ ॥

सं.टी. कुण्डस्याकारइवाकारोयस्य तथाभूतोवाब्जसाम्यः कमल सदृशोनाभिः स्यात्। अब्जे पद्मकुण्डेऽयं नाभिर्न स्यात्तत्र नाभिरूपायाः कर्णिकायाः सत्त्वात्। तथोक्तं शारदायाम्। कुण्डानां कल्पयेदन्तर्नाभिमम्बुजसन्निभम्। तत्तत्कुण्डानु-कारं वा मानमस्य निगद्यते। मुष्ट्यरत्नेकहस्तानां नाभेरुत्सेध-ता मता। नेत्रवेदाङ्गुलोपेत इति। अथ च नाभेः पद्मा कारस्यनोच्यते। तत्र नाभेर्योविस्तारः क्षेत्रस्य षडंशस्-पस्तदेवास्य क्षेत्रम्। तत्र दलाग्रे दलाग्रनिमित्तमिनांश-हानिः क्षेत्रस्य द्वादशांशहासः कार्यः शेषक्षेत्रे वन्हिवृत्त-

हस्त		१	२	३	४	५	६	७	८	९	१०	
क्षेत्र	अं	२४	३४	४१	४८	५३	५८	६३	६७	७२	७५	
	य	०	०	५	०	५	६	४	७	०	७	
उ. वि.	अं	४	५	७	८	९	९	१०	११	१२	१२	अर्काङ्गुलप
	य	०	५	०	०	०	७	५	३	०	५	
उ वि.	अं	६	८	१०	१२	१३	१४	१५	१७	१८	१९	क्षे. प १ मे.
	य	०	४	३	०	३	५	७	०	०	०	
१ मे. वि	अं	६	८	१०	१२	१३	१५	१५	१६	१८	१८	पंचमेखलापक्षेविस्तृतिः
	य	०	४	३	०	३	५	७	५	०	७	
	यू	०	०	२	०	२	४	०	६	०	६	
२ मे. वि	अं	५	६	८	१०	११	१२	१३	१३	१५	१५	
	य	०	०	५	०	१	१	१	७	०	६	
	यू	०	५	३	०	३	७	७	४	०	४	
३ मे. वि	अं	४	५	६	८	८	९	१०	११	१२	१२	
	य	०	५	७	०	७	६	४	१	०	५	
	यू	०	३	४	०	६	४	५	१	०	१	
४ मे. वि	अं	३	४	५	६	६	७	७	८	९	९	
	य	०	२	१	०	५	२	७	२	०	३	
	यू	०	०	५	०	५	६	४	७	०	७	
५ मे. वि.	अं	२	२	३	४	४	४	५	५	६	६	
	य	०	६	३	०	३	७	२	४	०	२	
	यू	०	५	६	०	६	१	३	५	०	५	
१ मे. उ	अं	९	१२	१५	१८	२०	२२	२३	२५	२७	२८	पंचमेखलापक्षेउच्छ्रितिः
	य	०	६	५	०	१	०	६	०	०	३	
	यू	०	०	७	०	०	२	४	५	०	५	
२ मे. उ	अं	७	१०	१२	१४	१६	१७	१९	२०	२१	२२	
	य	१	१	३	३	०	५	१	०	४	७	
	यू	५	५	७	२	६	०	४	४	७	७	
३ मे. उ	अं	५	७	९	१०	१२	१३	१४	१५	१६	१७	
	य	३	५	३	६	०	१	२	०	१	४	
	यू	२	२	०	३	४	६	३	३	५	१	
४ मे. उ	अं	३	५	६	७	८	८	९	१०	१०	१२	
	य	४	०	२	१	०	६	४	०	४	०	
	यू	६	६	०	५	३	४	२	२	४	४	
५ मे. उ	अं	१	२	३	३	४	४	४	५	५	६	
	य	६	४	१	५	०	३	६	०	१	३	
	यू	३	३	०	०	२	२	१	१	२	६	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्त्रिभिर्वृत्तैः समेने तत्राद्यं वृत्तं वै निश्चयेन कर्णां कर्णिका द्वितीयं वृत्तं केशराः केशरस्थानं तृतीयं वृत्तं पत्रकाणि पत्राणि स्युरथावशिष्टं दलाग्रमिति । अत्र मदीयं सूत्रं । क्षेत्रादेकादशगुणाद्युग्माश्वैरस्तरामकैर्युगनेत्रै र्भजेल्लब्धव्यासार्धा-न्नाभिमध्यतः । कर्णिकाद्यं लिखेद्वृत्तत्रयं वै कर्कटेन तु शेषं पत्राग्रमाख्यातं नाभिः स्यात्पद्मसन्निभः ।,शारदायां पद्मे क्षेत्रस्य सत्यज्य द्वादशांशं बहिः सुधीः । तन्मध्यं विभजेद्वृत्तैस्त्रिभिस्तत्र समन्ततः। आद्यं स्यात्कर्णिकास्थनं केशराणां द्वितीयकं तृतीयं तत्र पत्राणि मुक्तांशेन दलाग्रकमिति ॥ ६ ॥

भा. भा. पद्मकुण्ड को छोड़कर बाकी कुण्डों के मध्य में कुण्डो के सदृश अथवा पद्माकार नाभि बनावै । नाभि का विस्तार याने क्षेत्र और उच्छ्रिति नाभि सारिणी में लिखो है ।

पद्माकार नाभि के निर्माण के लिये सारिणी में प्रथमादि ३ व्यासार्ध लिखे हैं उन से वृत्त बनाकर प्रथमवृत्त कर्णिका २ वृत्त केशर तृतीय पत्र शेष क्षेत्र में पत्राग्र बनाना चाहिये ॥ ६ ॥

योनि लक्षणं स्रग्धरयाह ॥

मू. योनिर्व्यासार्धदीर्घा विततिगुणलवादायताङ्घ्रिद्विभागो
तुङ्गा तावत्समन्तात्परिधिरुपरिगा तावदग्रेण रम्या ।
निम्नं कुण्डं विशन्ती वलयदलयुगेनान्विताधोविशाला
मूलात्सच्छिद्रनालान्तरवटरुचिराश्वत्थपत्राकृतिः सा॥७॥

अ० व्यासार्धदीर्घा । विततिगुणलवादायता । अङ्घ्रिद्विभागोत्तुङ्गा । तावत्समन्तात्परिधिः । तावदुपरिगा । तावत् अग्रेण निम्नं यथास्यात्तथा तावदेव कुण्डं विशन्ती । वलयदलयुगेनान्विता । अधोविशाला । मूलात् सच्छिद्रनाला । अन्तरवटरुचिरा । एवं भूता या योनिः सा रम्या अश्वत्थपत्राकृतिः स्यात् ॥ ७ ॥

नाभिसारिणी ।

कुण्ड संख्या	०	१	२	३	४	५	६	७	८	९	१०
	अं	४	५	६	८	८	९	१०	११	१२	१२
नाभि क्षेत्रम्	य	०	५	७	०	७	६	४	१	०	१
	यू	०	३	४	०	४	३	५	१	०	१
	अं	२	[illegible]	३	४	४	४	५	५	६	६
उच्छ्रिति	य	०	६	३	०	३	७	२	४	०	२
	यू	०	५	६	०	६	१	३	५	०	५
	अं	०	०	१	१	१	१	१	१	१	१
१ व्यासार्ध	य	५	६	०	१	२	४	४	५	६	७
	यू	०	७	४	६	७	०	७	५	५	३
	अं	१	१	२	२	२	३	३	३	३	३
२ व्यासार्ध	य	२	५	१	३	५	०	१	३	५	६
	यू	०	६	०	४	६	०	६	२	२	७
	अं	१	२	३	३	४	४	४	५	५	५
३ व्यासार्ध	य	७	४	१	५	०	४	६	०	४	६
	यू	०	५	४	२	५	०	१	७	०	२

सं. टी. कुण्डेषु योव्यासार्धः तेन दीर्घा तथा या विततिर्विस्तृतिस्तस्यागुणलवात् तृतीयांशादायता विस्तृता । तथा चा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

न्धिद्विभागेन विस्तारस्य चतुर्विंशत्यंशेन पारिभाषिकाङ्गुलेन उत्तुङ्गोन्नता मेखलोपरिगितेत्यर्थः। तावत्पारिभाषिकाङ्गुलसम एव समन्तादभितः परिधिर्मेखला यस्याः सा। तावत्पारिभाषिकाङ्गुलसमएवोपरिगार्थादुपरिगा मेखला तावदग्रेणाग्रभागेन निम्नं यथा स्यात्तथा तावदेव कुण्डं विशन्ती प्रविशन्ती यच्च प्राकृतभूमेर्योन्याग्रोच्छ्रितिरेकादशाङ्गुला तथा मूलोच्छ्रितिर्द्वादशाङ्गुला यथैकाङ्गुला कुण्डे प्रविशन्ती भवेत्तथा विधेयेति वलयदलयुगेनार्द्धवृत्तद्वयेनान्विता युक्ता अधोविशालार्थादुपरि किंचित्संकोचवती मूलादुपस्थाद्योन्यारम्भप्रदेशात्सकाशात् योनिमध्येऽग्रं यावत् सच्छिद्रं सरन्ध्रं नालं कमलनालसदृशं यस्यां सा तथान्तेर मध्ये शुचिघृतधारणार्थं वटेन गर्त्तेन रुचिरा सुन्दरा एवंभूता या योनिः सा रम्या रमणीयाश्वत्थपत्राकृतिः स्यात्। तथोक्तं वायवीये। मेखलामध्यतः कुर्यात्पश्चिमे दक्षिणेऽपि वा। शोभनां मध्यतः किञ्चिन्निम्नामुन्मीलितां शनैः। त्रैलोक्यसारे। दीर्घा सूर्याङ्गुला योनिस्त्र्यंशोना विस्तरेण तु। एकाङ्गुलोच्छ्रिता सा तु प्रविष्टाभ्यन्तरे तथा। कुम्भद्वयार्धसहिताऽश्वत्थदलवन्मता। अङ्गुष्ठमेखलायुक्ता मध्ये त्वाज्यधृतिक्षमेति। पंचरात्रे। अर्काङ्गुलाच्छ्रिता योनिर्विदध्यात्तावदायतेति ॥ ७ ॥

भा. भा. प्रकृति क्षेत्ररचना में जो व्यासार्ध उस के समान लम्बी और प्रकृति क्षेत्र के विस्तार यानें व्यास के तीसरे भाग के वरोवर चौड़ी तथा विस्तार के चौवीसवें भाग के वरोवर मेखला से ऊंची और इतना ही योनि के अभितः परिधि और इतनाही योनि से ऊंची परिधि और उतनी ही अग्र भाग नम्र तथा उतनी ही कुण्ड में प्रवेश करती हुई तथा दो वृत्तार्ध और योन्यारम्भ से अग्रतक मध्यम में सरन्ध नाल से मुक्त नीचे भाग स्थूल और ऊर्ध्व भाग कुछ २ संकुचित योनि वनाना अर्थात् प्राकृत भूमि से योनि का अग्रभाग ११ अंगुल और आरम्भ १२ अंगुल ऊंचा

चाहिये। योनिसारिणी में दैर्घ्य विस्तार तथा व्यावहारिक अंगुल मान से पारिभाषिक अंगुल का मान लिखा है इससे योनि वनाना सुगम है ॥ ७ ॥

योनिसारिणी।

हस्त		१	२	३	४	५	६	७	८	९	१०
यो. दै.	अं	१२	१७	२०	२४	२६	२९	३१	३३	३६	३७
	य	०	०	६	०	६	३	६	३	०	६
यो. वि.	अं	८	११	१३	१६	१७	१९	२१	२२	२४	२५
	य	०	३	७	०	७	५	१	२	०	२
पा. अं. १ मा.	अं	१	१	१	२	२	२	२	२	३	३
	य	०	३	६	०	२	४	५	७	०	१

द्वादशाङ्गुलमेखलापक्षे योनिलक्षणमाह

मू० अथार्काङ्गुलपक्षे तु मेखलानां दशाङ्गुलैः।
विस्तृता तिथिभिर्दीर्घाङ्गुलिभिर्योनिरिष्यते ॥ ८ ॥

अ० अथ तु मेखलानामर्काङ्गुलपक्षे दशाङ्गुलैर्विस्तृता तिथिभिरङ्गुलिभिर्दीर्घा योनिरिष्यते ॥ ८ ॥

सं. टी. अथ तु मेखलानामर्काङ्गुलपक्षेऽर्थाद्यत्रपारिभाषिकद्वादशाङ्गुलमिता मेखला रसांशकादुन्नतविस्तृतेत्यादिनाचिकीर्षिता तत्रपारिभाषिकैर्दशाङ्गुलैर्विस्तृता तथा तिथिभिः पंचदशभिः पारिभाषिकाङ्गुलिभिर्दीर्घा योनिरिष्यते कथ्यत इति। तथोक्तं प्रयोगसारे। स्थितां प्रतीच्यामायामे सम्यक्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पंचदशाङ्गुलाग्राम्। द्विपंचाङ्गुलविस्तारां षट्चतुर्थ्यङ्गुलां क्रमात्। त्रयोदशाङ्गुलोन्मेधां योनिं कुण्डस्य कारयेदिति ॥ ८ ॥

भा. भा. मैं रसांशकादुन्नत विस्तृताश्च इस श्लोक में लिख आया हूँ कि यहीं द्वादशाङ्गुल पक्षीय मेखला है कारण यह कि आचार्य यहां अर्काङ्गुल पक्ष पारिभाषिक अंगुल के मान से कहते हैं, जैसे ४ हाथ कुण्ड में क्षेत्र ४८ का चौवीशवां भाग २ व्यावहारिक अङ्गुल हुआ और १२ पारिभाषिक अंगुल में २४ व्यावहारिक अंगुल हुआ तथा क्षेत्र का रसांश ८ व्यावहारिक अंगुल हुआ इसलिये इस मत से मेखला की ऊंचाई २४ व्यवहारिक अंगुल हुई जोकि १२ पारिभाषिक अंगुल के समान है इसी तरह अन्यत्र भी जानना इससे यह सिद्ध हुआ कि रसांशकान् यही द्वादशाङ्गुल पक्ष है जहां इस मत से मेखला बनाया जाय वहां पारिभाषिक १० अंगुल चौड़ी और १५ अंगुल लंबी योनि बनाना चाहिये ॥ ८ ॥

ग्रन्थोपसंहारमाह ।

मू० इति मण्डपकुण्डसिद्धिमेनां रुचिरां विट्ठलदीक्षितोऽव्यधत्त । अधिकाशिनगर्य्युमेशतुष्टयै विबुधःशोधयतादिमां विचार्य्य॥९॥ शशियुगतिथिगण्ये याति शाके वरेण्ये विभवशरदि रम्ये मासि शस्ये तपस्ये । शशधरभृति ऋक्षेऽमुष्यपक्षे वलक्षे कमलनयनतिथ्यां भानुमद्वारवत्याम् ॥ १० ॥

अं० इति विट्ठलदीक्षितः शशियुगतिथिगण्ये शाके याति सति वरेण्ये रम्ये विभवशरदि शस्ये तपस्ये मासि शशधरभृति ऋक्षे अमुष्य वलक्षे पक्षे भानुमद्वारवत्यां कमलनयनतिथ्यां एनां रुचिरां मण्डपकुण्डसिद्धिं अधिकाशिनगर्य्युमेशतुष्टयै व्यधत्त । विबुधोविचार्य इमां शोधयतात् ॥ ९ ॥ १० ॥

सं.टी. इतीत्थं विट्ठलदीक्षितः शशियुगतिथिगण्ये एकचत्वारिंशदधिकपंचदशशतसंख्ये १५४१ शाके याति गच्छति सति वरेण्यउत्तमे रम्ये रमणीये विभवशरदि विभवेऽब्दे शस्ये प्रशस्ते तपस्ये फाल्गुने मासि शशधरभृतिऋक्षे मृगशिरोभे अमुष्य चन्द्रस्य वलक्षे वलयुक्ते पक्षेऽर्थात्सिते पक्षे भानुमद्वारवत्यां रविवारयुक्तायां कमलनयनो हरिस्तस्य तिथ्यामर्थाद्द्वादश्यां एनां रुचिरां प्रशस्तां मण्डपकुण्डसिद्धिं अधिकाशिनगर्य्यां काशीपुर्य्यां यावुमेशौ शिवपार्वती तयोस्तुष्टयै प्रीतये व्यधत्त कृतवान् । विबुधः विचार्य्य इमां शोधयताच्छुद्धां करोत्वित्यर्थः ॥ ९ ॥ १० ॥

भा. भा. विट्ठल दीक्षितजीने इस ग्रन्थ को १५४१ शक में श्रीशिवपार्वतीजी के प्रसन्नार्थ श्रीकाशीजी में ही बनाया ॥

और फाल्गुन शुक्ल १२ रविवार को इस ग्रन्थ की समाप्ति हुई ॥९॥१०॥

इति श्रीज्यौतिषाचार्य पण्डित बलदेव पाठक कृतायां बलदाटीकायां भाषाभाष्यसमेतायां तृतीयाध्यायः समाप्तः ॥ ३ ॥

∴ अथवापि मृदा सुवर्णभासा करमानं चतुरङ्गुलोच्चमल्पे । हवने विदधीत वाङ्गुलोच्चं विबुधः स्थण्डिलमेव वेदकोणम् ॥ ॥५६॥

अङ्गीकार्य - - - - - - - - अन्नार्थपीता ॥ ५८॥

समाप्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वास्तवकुण्डसिद्धिः ।

कुण्डाववोधनविधौ परानिर्मितानि
स्थूलप्रकारजनितान्यशुभानि वुध्वा ।
तेन ज्यकागणितवासनया प्रसङ्गा
द्दिक्कुण्डसाधनविधिं प्रवदामि सूक्ष्मम् ॥ १ ॥

चतुर्भुजं वृत्तमथार्द्धचन्द्रं त्रिकोणकं योनिसमाह्वयं च ।
षडस्त्रमष्टास्त्रमथाष्टपत्रपद्माह्वयं चापितु पंचकोणम् ॥ २ ॥
सप्तास्त्रकं चेति दशैव कुण्डान्युक्तानि तज्ज्ञैरिह सत्फलार्थम् ।
हस्तादिहस्तादिफलोन्मितानि तत्राङ्गुलैः सिद्धमितैश्च हस्तः॥३॥

षष्ठिव्यङ्गुलकैरत्राङ्गुलं व्यङ्गुलकं तथा ।
प्रतिव्यङ्गुलषष्ठ्या स्याद्गणितार्थं क्रमस्त्वयम् ॥ ४ ॥

तत्रैक हस्तजक्षेत्रफलं जिनकृतेः समम् ।
द्वित्र्यादिगुणितं तद्धि द्व्यादिहस्तोद्भवं सदा ॥ ५ ॥
फलमेकभवं द्व्यादिगुणितं द्व्यादिहस्तजम् ।
नहि द्व्यादिकराणां चांगुलवर्गसमं हि तत् ॥ ६ ॥
आयुरारोग्यमैश्वर्यं लभते समवाहुके ।
सूक्ष्मक्षेत्रफले कुण्डे तद्ध्रासोविषमे भुजे ॥ ७ ॥
अज्ञैस्त्र्यस्त्रादिकुण्डेषु यैर्भुजाविषमाः कृताः ।
चतुर्भुजेऽपि विषमाभुजाः किं न कृताश्चतैः ॥ ८ ॥
एकद्विघ्नफलाभ्यां ये पदे ते वाहुविश्रुती ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यातां समश्रुतौ चाद्ये कुण्डे तुल्यचतुर्भुजे ॥ ९ ॥
आसन्नमूलग्रहणाद्भुजो २४ व्यास ३३।५६ श्चतुर्भुजे ।
एकहस्ते द्व्यादिहस्तेष्वेवं साध्यं विचक्षणैः ॥ १० ॥
अष्टघ्नात्फलवर्गाच्च पंचभक्तात्पदात्पदम् ।
अभीष्टे वर्त्तुल कुण्डे व्यासमानं प्रजायते ॥ ११ ॥
आसन्नमूलग्रहणाद्व्यासः सप्ताश्वि २७ सम्मितः ।
एकहस्ते तथा द्व्यादिहस्ते स्वस्वफलक्रमात् ॥ १२ ॥
द्वात्रिंशद्गुणितात्पंचभक्ताच्च फलवर्गतः ।
मूलमूलं दलेन्द्वाभे व्यासमानं प्रजायते ॥ १३ ॥
आसन्नमूलग्रहणादङ्गुलान्यष्टवन्हयः ३८ ।
व्यङ्गुलानि दश १० व्यासश्चैकहस्तेऽर्धचन्द्रके ॥ १४ ॥
समत्रिभुजकुण्डस्य फलवर्गोनृपाहतः ।
त्रिभक्तस्तत्पदान्मूलं भुजः स्यादथ तत्कृतेः ॥ १५ ॥
स्वत्र्यंशसंयुता कार्या व्यासः स्यात्तत्पदं त्विह ।
नृपघ्नाद्वा फलाद्वर्गोभैर्हृतस्तत्पदात्पदम् ॥ १६ ॥
व्यासमानं भवेत्तत्र चैकहस्ते भुजोभवेत् ।३६।२८।
कुण्डेऽङ्गुलादिकोव्यासश्चासन्नपदतः४२।७ किल ॥ १७ ॥
फलात्खखाष्टवेदघ्नात्त्र्यद्रिसाद्रिहृतात्पदम् ।
बाहुरश्वत्थपत्राभे योनिकुण्डे प्रजायते ॥ १८ ॥
समत्रिभुजवत्तस्माद्व्यासोप्यत्राथ हस्तजे ।
कुण्डे भुजोभवे १९।४६।१६ दूव्या ।
सो २२।५० ङ्गुलाद्योगणितेन वै ॥ १९ ॥

इत्येकोयोनिकुण्डप्रकारः

अथवाश्वत्थपत्राभे योनिकुण्डे फलतुं यत् ।
षष्टिवर्गगुणादस्मात्त्रिद्विदन्तैर्हृतात्पदम् ॥ २० ॥
व्यासमानं भवेन्नूनं तद्वर्गार्धपदं भुजः ।
हस्तयोनौ व्यासमानमिदं २५।२२।२० ॥
बाहुरयं १७।५६।८ सदा ॥ २१ ॥

इतिद्वितीययोनिकुण्डप्रकारः ।

एवं द्वितीयकुण्डस्य फलवर्गोऽब्धिसंगुणः ।
भैर्हृतस्तत्पदान्मूलं भुजमानं प्रजायते ॥ २२ ॥
अष्टघ्नाच्च फलाद्वर्गोभैर्हृतस्तत्पदात्पदम् ।
व्यासोभवेद्द्विनिघ्नोऽसौभुजोव्यासोऽथवानिशम् ॥ २३ ॥
आसन्नमूलग्रहणाद्धस्तकुण्डे भुजस्त्वयम् १४।५३।
व्यासोऽङ्गुलात्मकश्चायं २९।४६ सम्यक् शिल्पविदोदितः ॥२४॥
एवमष्टास्रकुण्डस्य फलं पंचाद्रिसंगुणम् ।
त्रिपंचविहृतं तस्य मूलं व्यासोभवेद्ध्रुवम् ॥ २५ ॥
शून्यं द्वाविंशतिस्त्र्यूनषष्ठिः ०।२२।५७ सावयवोगुणः ।
तद्गुणोव्यासएवात्र भुजः स्यादष्टकोणके ॥ २६ ॥
एकहस्ताष्टकोणस्य व्यासआसन्नमूलतः ।२८।३३।
भुजश्चायं १०।५५ तथाद्व्यादिहस्तकुण्डे समानयेत् ॥२७॥
अथ पद्माख्यकुण्डे तु स्वफलं गुणितं च तत् ।
शून्याङ्गवाह्निभिर्वह्निवेदसागरभाजितम् ॥ २८ ॥
तन्मूलं व्यासमानं स्यात्ततश्चाष्टास्रवद्भुजः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकहस्ते च पद्माख्ये व्यासो २१ । ३८ । २५
बाहुस्तथा ८ । १६ । ३८ । ङ्गुलैः ॥ २९ ॥
अथान्यथाष्टपत्रैस्तु पद्मकुण्डं वदाम्यहम् ।
शून्यं षट् सप्त मनवो ०।६।७।१४ गुणः सावयवस्त्वयम् ॥३०॥
फलात्तद्गुणितान्मूलं भुजमानं प्रजायते ।
सोऽष्टास्त्रव्यासगुणकोद्धृतोव्यासोभवेद्ध्रुवम् ॥ ३१ ॥
तथैकहस्तपद्माख्ये भुजः सावयवस्त्वयम् ।७।३९।५५।
व्यासश्चायं ।२०।३।१२ द्व्यादिहस्तेप्येवं साध्यं विचक्षणैः ॥३२॥
फलं पञ्चास्त्रकुण्डोत्थं खनागेन्दुगुणं हृतम् ।
नगाभ्रभूमिभिर्लब्धात्पदं व्यासोभवेदिह ॥ ३३ ॥
शून्यं पंचाग्नयोभूपा ०।३५।१६ गुणः सावयवस्त्वयम् ।
तद्गुणोव्यासएवात्र भुजः स्याद्गुणितेन वै ॥ ३४ ॥
अथैकहस्तपंचास्त्रे आसन्नपदतस्त्विह ।
व्यासो ३१।९ भुजो १८।१८ भवेन्नूनमथ सप्तास्रकुण्डके ॥३५॥
फलाच्छून्याम्बरार्कघ्नाद्भूद्विनागहृतात्पदम् ।
व्यासोभवेद्धि सप्तास्त्रे भुजोऽप्येवं ततः सखे ॥ ३६ ॥
शून्यं षड्विंशतिर्भूमिः षड्बाणागुणकोऽस्त्ययम् ०।२६।१।५६।
तद्घ्नव्यासोभुजश्चाथ दोर्व्यासौ चैकहस्तजौ ॥ ३७ ॥
भु० १२।३५।२१ व्या० २९।०।५६ ॥

इतिकुण्डगणितप्रकारः ।

अथतत्साधनप्रकाराः ॥

वृत्तकुण्डं निजव्यासदलभ्रमणतोभवेत् ।
अर्धचन्द्रं निजव्यासदलवृत्तस्य खण्डकम् ॥ ३८ ॥

(९)

त्रिचतुः पंचषट्सप्ताष्टास्त्रकुण्डेषु विस्तृतेः ।
अर्धेनादौ लिखेद्वृत्तं कार्याः स्वस्वविभागकाः ॥ ३९ ।
समाश्चैकैककारेखाः प्रतिभागं वृतौ ततः ।
पूर्णाज्यावच्च तेन स्यात्स्वस्वकुण्डास्त्रकाकृतिः ॥ ४० ॥
संलग्नावा भुजावृत्ते देयास्तद्दशतास्त्विह ।
स्वस्वास्त्राकृतिजं कुण्डं यजमानाङ्गुलैर्भवेत् ॥ ४१ ॥
ज्ञाते भुजे वृतावत्र विभागाअप्रयोजकाः ।
विभागज्ञानतश्चैवं भुजास्ते चाप्रयोजकाः ॥ ४२ ॥
समत्रिभुजवत्पूर्वं कृत्वा तुल्यत्रिवाहुकम् ।
योनिकुण्डे ततोवाहुत्रयमध्याद्भुजाद्बहिः ॥ ४३ ॥
मण्डलार्धत्रयं लेख्यं वाह्वर्धभ्रमणादिह ।
एकार्धवृत्तमध्याच्च पार्श्वयोस्तद्भुजाग्रगे ॥ ४४ ॥
कार्ये रेखेऽथतत्सक्ते चापे त्यक्त्वावशेषकम् ।
योनिकुण्डं भवेदाद्यमश्वत्थदलयोनिभम् ॥ ४५ ॥
एवं व्यासार्धमानेन वृत्तं कृत्वा चतुर्भुजम् ।
भुजतुल्यभुजैस्तत्र स्वेष्टकोणाच्चपार्श्वयोः ॥ ४६ ॥
भुजार्धकेन्द्रतोवृत्तदले वाह्वर्धमानतः ।
कार्ये भुजाद्बहिश्चान्यद्योनिकुण्डं च तद्भवेत् ॥ ४७ ॥
पूर्वं व्यासभुजाभ्यां च यथोक्त्याष्टास्त्रकं लिखेत् ।
ततस्तद्बाहुखण्डेन वाह्वर्धात्केन्द्रतः किल ॥ ४८ ॥
वृत्तार्धं वाहुतश्चोर्ध्वं विलिखेदासमन्ततः ।
तद्धि तुल्यचतुर्भागं कृत्वा चाद्यतृतीयकौ ॥ ४९ ॥
विभागान्तौ च यौ ताभ्यां तद्बाहुदलमानतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भ्रमणान्मत्स्यमुत्पाद्य तन्मुखं वृत्ततोबहिः ॥ ५० ॥
यदस्ति तद्गते ताभ्यां विभागाभ्यां च रेखिके ।
तद्बाहुखण्डतुल्ये च समन्तात्तेन तद्भवेत् ॥ ५१ ॥
अष्टपत्रात्मकं कुण्डं पद्माख्यं पद्मवच्छुभम् ।
व्यक्ताव्यक्तोपपत्त्यैव सिद्धं सूक्ष्मं मयोदितम् ॥ ५२ ॥
द्वितीयपद्मकुण्डेऽपि साध्यमष्टास्रकं पुरा ।
तद्भुजाद्यन्तचिन्हाभ्यां व्यासार्धाद्भुजमानतः ॥ ५३ ॥
वृत्तत्रिभागभ्रमणान्मत्स्यं कृत्वाथ यद्भुजात् ।
बहिःस्थितं च यन्मत्स्यखण्डं पत्रं तदेवहि ॥ ५४ ॥
एवं प्रतिभुजं पत्रादष्टपत्रोद्भवं किल ।
पद्मकुण्डं भवेद्व्यक्ताव्यक्तवासनया परम् ॥ ५५ ॥
द्व्यादिहस्तेषु कुण्डेषु स्वस्वोक्तभुजविस्तृती ।
कार्ये ताभ्यां यथोक्त्यैव यजमानाङ्गुलैः किल ॥ ५६ ॥
स्वस्वास्याकृतिजान्यत्र कुण्डानि प्रभवन्ति च ।
द्व्यादिहस्ताख्यकुण्डेषु फलमूलजिनांशकः ॥ ५७ ॥
प्रकल्प्य वाङ्गुलं तत्र तैर्यथोक्तप्रकारतः ।
एकहस्तोक्तविस्तारभुजाभ्यामेव साधयेत् ॥ ५८ ॥
वासनानवबोधेन बहुधा शुष्कपण्डितैः ।
कृतं सुस्थूलकुण्डानां साधनं तन्न मे मतम् ॥ ५९ ॥
सम्वादमेत्युक्तफलेन सम्यक् तदेव कुण्डं किल सप्रमाणम् ।
नान्यन्मुनीन्द्रोक्तमपीह यस्मात्प्रत्यक्षसिद्धौ नहि वाक्प्रमाणम् ६०
अन्तर्बहिः कोणभवं तु कुण्डं द्विघ्नं स्वसंख्याकभुजैरलीकम् ।
यैरुक्तमष्टास्रमहो कथं तैस्त्र्यब्ध्यस्रकं चापि तथाहृतं न ॥ ६१ ॥

इमानि कुण्डानि मयोदितानि स्वार्षागमप्रोक्तदिशिस्थितानि ।
शुद्धावनौ चाम्बुसमीकृतायां कार्य्याणि तज्ज्ञैरिह सत्फलार्थम् ६२
यथोदितक्षेत्रफलस्य साम्यप्रदर्शनार्थं तु ममैषयत्नः ।
कुण्डस्य होमार्थमिहाथ तत्रत्योऽन्योविशेषःसुधियान्यतन्त्रात् ६३

इति श्री ज्यौतिषाचार्य्यपण्डितबलदेवपाठकप्रणीता
वास्तवकुण्डसिद्धिः समाप्ता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२५।१०।९३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu